"प्रसिद्धौ कार्याणां प्रवदति जनः पार्थिवबलं
विपत्तौ विस्पष्टं सचिवमतिदोषं जनयति ।
अमात्या इत्युक्ताः श्रुतिसुखमुदारं नृपतिभिः
सुसूक्ष्मं दण्डचन्ते मतिबलविदग्धाः कुपुरुषाः ॥"

(*Anka 1, sloka 5.*)

The commencement of the night is described below:—

"श्यामृष्टसूर्यतिलको विततोडुमालो
नष्टातपो मृदुमनोहरशीतवातः ।
संलीनकामुकजनः प्रविकीर्णचोरो
वेषान्तरं रचयतीव मनुष्यलोकः ॥"

(*Anka 2, sloka 13.*)

The supreme efficacy of Fate is shown in the following verse:—

"यत्ने कृते यदि न सिध्यति कोऽत्र दोषः
को वा न सिध्यति ममेति करोति कार्यम् ।
यत्नैः शुभैः पुरुषता भवतीह नृणां
दैवं विधानमनुगच्छति कार्यसिद्धिः ॥"

(*Anka 3, sloka 12.*)

Effects of darkness (from *Balacharita*) are here depicted:—

"अप्रकाशा इव दिशो घनीभूता इव द्रुमाः ।

सुनिविष्टस्य लोकस्य कुतो रूपविपर्ययः ॥"

(*Anka 1, sloka 16.*)

"दुद्दिणविणट्ठजोह्णा ळत्ती वट्टइ णिमीळिआकाळा ।
संपाउदप्पसुत्ता णीळणिवषणा जहा गोवी ॥"

(*Anka 3, sloka 19.*)

The benedictory verse in *Madhyamavyâyoga* runs as follows:—

"पायात् स वोऽसुरवधूहृदयावसादः
पादो हरेः कुवलयामलखड्गनीलः ।
यः प्रोद्यतस्त्रिभुवनैकमणे रराज
वैदूर्यसंक्रम इवाम्बरसागरस्य ॥"

(*Sloka 1.*)

Here we have the description of a *Râkshasa*:—

"सिंहास्यः सिंहदंष्ट्रो मधुनिभनयनः स्निग्धगम्भीरकण्ठो
बभ्रुभ्रूः श्येननासो द्विरदपतिहनुर्दीर्घविश्लिष्टकेशः ।
व्यूढोरा वज्रमध्यो गजवृषभगतिर्लम्बपीनांसबाहुः
सुव्यक्तं राक्षसीजो विपुलबलयुतो लोकवीरस्य पुत्रः ॥"

(*Sloka 26.*)

Here is *Karna's* reply to *Salya* who objects to the giving away of his armour and ear-ring (from *Karnabhâra*):—

"शिक्षा क्षयं गच्छति कालपर्ययात्
सुबद्धमूला निपतन्ति पादपाः ।
जलं जलस्थानगतं च शुष्यति
हुतं च दत्तं च तथैव तिष्ठति ॥"

(*Sloka 19.*)

The description of *Duryodhana* who had fallen down with his thigh broken (from *Ûrubhanga*) is contained in this verse:—

"श्रीमान् संयुगचन्दनेन रुधिरेणार्द्रानुलिप्तच्छवि-
भूसंसर्पणरेणुपाटलभुजो बालव्रतं प्राहितः ।
निर्वृत्तेऽमृतमन्थने क्षितिधरान्मुक्तः सुरैः सासुरै-
राकर्षन्निव भोगमर्णवजले श्रान्तोज्झितो वासुकिः ॥"

(*Sloka* 28.)

The sorrowful words of *Lakshmana* as *Sita* faces the ordeal by fire (अग्निप्रवेश) (from *Abishekanâtaka*) are quoted below :—

"विज्ञाय देव्याः शौचं च श्रुत्वाचार्यस्य शासनम् ।
धर्मस्नेहान्तरे न्यस्ता बुद्धिर्दोलायते मम ॥"

(*Anka 6, sloka 21.*)

Râvana's words expressing that he need not anticipate any dangerous consequences from *Râma* are contained in :—

"कथं लम्बसटः सिंहो मृगेण विनिपात्यते ।
गजो वा सुमहान् मत्तः सृगालेन निहन्यते ॥"

(*Anka 3, sloka 19.*)

Râma's utterance in *Pratimânâtaka* may be noted:—

"आरब्धे पटहे स्थिते गुरुजने भद्रासने लङ्घिते
स्कन्धाच्चारणनम्यमानवदनप्रच्योतितोये घटे ।
राज्ञाहूय विसर्जिते मयि जनो धैर्येण मे विस्मितः
स्वः पुत्रः कुरुते पितुर्यदि वचः कस्तत्र भो विस्मयः ॥"

(*Anka 1, sloka 4*)

The prostration of *Râma* at his father's feet immediately after he came to know of the royal mandate for his coronation as narrated to *Sita*, is described in these words;—

"समं बाष्पेण पतता तस्योपरि ममाप्यधः ।

पितुर्मे क्लेदितौ पादौ ममापि क्लेदितं शिरः ॥"

(*Anka 1, sloka 5.*)

The words addressed to *Rāma* by *Lakshmaṇa* who got extremely angry at *Kaikeyi's* conduct are as follows:—

"यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दया
स्वजननिभृतः सर्वोऽप्येवं मृदुः परिभूयते ।
अथ न रुचितं मुञ्च त्वं मामहं कृतनिश्चयो
युवतिरहितं कर्तुं लोकं यतश्छलिता वयम् ॥

(*Anka 1, sloka 18.*)

Bharata's feelings of surprise at the prospective sight of his own people may be quoted:—

"पतितमिव शिरः पितुः पादयोः स्निह्यतेवास्मि राज्ञा समुत्थापित-
स्त्वरितमुपगता इव भ्रातरः क्लेदयन्तीव मामश्रुभिर्मातरः ।
सदृश इति महानिति व्यायतश्चेति भृत्यैरिवाहं स्तुतः सेवया
परिहसितमिवात्मनस्तत्र पश्यामि वेषं च भाषां च सौमित्रिणा ॥"

(*Anka 3, sloka 3.*)

Bharata's reply to *Kaikeyi* may also be cited:—

"वयमयशसा चीरेणार्यो नृपो गृहमृत्युना
प्रततरुदितैः कृत्स्नायोध्या मृगैः सह लक्ष्मणः ।
दयिततनयाः शोकेनाम्बाः स्नुषाध्वपरिश्रमै-
र्धिगिति वचसा चोग्रेणात्मा त्वया ननु योजिताः ॥"

(*Anka 3, sloka 16.*)

Here is another saying of *Bharata*:—

"तत्र यास्यामि यत्रासौ वर्तते लक्ष्मणप्रियः ।
नायोध्या तं विनायोध्या सायोध्या यत्र राघवः ॥"

(*Anka 3, sloka 22.*)

The benedictory verse in the work (of unknown name) runs as follows:—

"पादः पायादुपेन्द्रस्य सर्वलोकोत्सवः स वः ।
व्याविद्धो नमुचिर्येन तनुताम्रनखेन खे ॥"

So far with reference to verses. The superior excellence of sentences which are not subject to the restrictions of versification is everywhere to be observed in these *Rūpakas*. It really surpasses in grandeur the style of other works and is incomparable. A perusal of the work will make this clear; hence no illustrations are given.

Bhasa's followers.

There is no path trodden by great poets like *Kalidâsa*, but is pioneered by *Bhâsa*. There are many points of similarity to *Bhâsa's* work in *Abhijnânasâkuntala* the best known work of *Kâlidâsa*, who has attained unrivalled fame as the prince of poets, since the era of *Vikramâditya*.

For example, a *sloka* in the fourth Act of *Abhishekanâtaka* runs thus:—

"यस्यां न प्रियमण्डनापि महिषी देवस्य मन्दोदरी
स्नेहाल्लुम्पति पल्लवान् न च पुनर्वीजन्ति यस्यां भयात् ।
वीजन्तो मलयानिला अपि करैरस्पृष्टबालद्रुमा
सेयं शक्ररिपोरशोकवनिका भग्नेति विज्ञाप्यताम् ॥"

There is a similar verse in the fourth Act of *Sâkuntala*:—

"पातुं न प्रथमं व्यवस्यति पयो युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥"

Here it may be observed that there is not only similarity of ideas between the two *slokas* but the very same sweet and melodious expressions, such as 'प्रियमण्डनापि', 'स्नेहात्', 'पल्लवान्' 'सेयं', are used by *Kâlidâsa* also. Again in the first Act of *Bâlacharita*, the following verse has reference to *Devakî*, who, having entrusted

the child to *Vasudeva* seems, as it were, to proceed towards two different directions; her body going towards her place of confinement, but her mind towards the child:—

"हृदयेनेह तत्राङ्गैर्द्विधाभूतेव गच्छति ।
यथा नभसि तोये च चन्द्रलेखा द्विधा कृता ॥"

There is a striking similarity between this verse and the following one in the first Act of *Sâkuntala:*—

"गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः ।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥"

The following line in the first Act of *Svapnavâsavadatta*, viz.,

"विस्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्ययाः",

is, by a slight change, rendered thus in the first Act of *Sâkuntala:*—

"विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगाः"

Similarly, there may be observed several other points of resemblance between the works of *Bhâsa* and those of *Kâlidâsa:*—

Again, such striking similarities can be clearly noticed in *Bhavabhûti's* works also, on a close examination. As instances, may be taken *Atreyi's* discourse in the 2nd Act of *Uttararâma-charita* which closely follows that of the *Brahmachâri* in the first Act of *Svapnavâsavadatta*, as also that of the *Vidyâdhara* in the sixth Act which follows a similar discourse in the sixth Act of *Abishekanâtaka*.

Again, the use of *Dandaka* in the fifth Act of *Mâlatîmâdhava* bears a strong analogy to the *Dandaka* form employed in the fifth Act of *Avimâraka*.

Mrichchhakatika compared.

The work, known as *Mrichchhakatika* which is reputed to be older than *Kâlidâsa's* plays not only contains many points of similarity to *Bhâsa's* works but the very same sentences are taken wholesale from the one in the other. Thus, several verses and sentences in *Chârudattanâtaka* are either, literally transcribed, or, are made to undergo but slight alteration in *Mrichchhakatika*.

"विदूषकः —कामं पसंसेदु भवं । मम खु दाव गाअन्तो मणुस्सो इत्थिआ वि पठन्ती उभअं आदरं ण देदि । गाअन्तो दाव मणुस्सो रत्तसुमणावेट्ठिदो विअ पुरोहिदो दिढं ण सोभइ । इत्थिआ वि पठन्ती छिण्णणासा विअ धेणुआ अदिविरूवा होइ ।"

Similarly in *Mrichchhakatika*:—

"चारुदत्तः—अहो अहो साधु साधु रेभिलेन गीतम् । वीणा हि नामासमुद्रोत्थितं रत्नम् । कुतः"

"विदूषकः—मम दाव दुवेहिं जेव्व हस्सं जाअदि । इत्थिआए सक्कअं पठन्तीए मणुस्सेण अ काअलिं गाअन्तेण । इत्थिआ दाव सक्कअं पठन्ती दिण्णणवणस्सा विअ गिट्ठी अहिअं सुसुहाअदि । मणुस्सो वि काअलिं गाअन्तो सुक्खसुमणोदामवेट्ठिदो वुड्ढपुरोहिदो विअ मन्तं जवन्तो दिढं मे ण रोअदि ।"

The fourth Act of *Chârudatta* has the following:—

"सज्जलकः—मदनिके ! किं न पर्याप्तं, द्वितीयमप्यनार्यं करिष्यामि । न खल्वत्र शस्त्रेण कश्चित् परिक्षतो व्यापादितो वा ।

Similar words in *Mrichchhakatika* are:—

"शर्विलकः—मदनिके ! भीते सुप्ते न शर्विलकः प्रहरति । तन्मया न कश्चिद् व्यापादितो नापि परिक्षतः ।

Another sentence in the fourth Act of *Chârudatta* runs as follows.—

"सज्जलकः—आर्यचारुदत्तेनास्मि प्रेषितः, यस्तावदलङ्कारो मम हस्ते निक्षिप्तः, स त्वयं भोगमलिनतया गृहस्यासान्निध्यात् कौटुम्बिकानां दुरारक्षः । तद् गृह्यतामिति ।"

The analogous passage in *Mrichchhakatika* runs thus:—

"शर्विलकः—सार्थवाहस्त्वां विज्ञापयति—जर्जरत्वाद् गृहस्य दूरक्षमिदं भाण्डम् । तद् गृह्यतामिति ॥"

Many other analogous passages can be easily pointed out.

Again, the plot in both the plays centres round *Chârudatta.* It thus follows that the one should be the basis of the other. It may, however, be appropriate to observe that *Chârudattanâtaka* alone can be the source wherefrom *Mrichchhakatika* is derived; for it is only in latter-day plays that the work and its author are specifically mentioned. While the *Prastâvana* in *Mrichchhakatika* contains a description of the poet and his work, the same is wanting in *Chârudatta*, which only goes to show that the former is of a subsequent date. However, *Mrichchhakatika* contains many excellent passages which are not met with in *Chârudatta.* Hence, the proper inference seems to be that the short play of *Chârudatta* has been amply enlarged by the addition of fine passages, which renders the plot even more interesting, and has, under the name of *Mrichchhakatika,* become famous as the work of *Sûdraka.* Thus, *Mrichchhakatika* being almost another version of *Chârudatta,* it is but proper that learned men should regard it as a very ancient work and its author as belonging to a very remote period, under the false impression that he is the original author, though his work simply consisted in rebuilding with old materials. There is no authority to say that *Sûdraka* must have lived prior to *Kâlidâsa,* but it is certain that he is a predecessor of *Vâmana,* the Rhetorician; for he expressly says in his *Kâvyâlankârasûtravritti:*—

"शूद्रकादिरचितेषु प्रबन्धेष्वस्य (श्लेषाख्यगुणस्य) भूयान् प्रपञ्चो दृश्यते ।"

Thus, it is clear that the poetical eminence of *Bhâsa* has been the mainstay of poets like *Kâlidâsa* and *Sûdraka.*

Certain peculiar uses.

Here and there in these *Nâtakas,* are to be met with, certain forms which are repugnant to the strict rules of grammar and Rhetoric. They are like the following:—

१. 'अपरिचयात्तु न श्लिष्यते मे मनसि ।" (*Svapna, Anka 1.*)

२. "आपृच्छामि भवन्तौ ।" (*Svapna. Anka 1.*)

३. "साधुजनहस्तं गतैषा नोत्कण्ठिष्यति ।" (*Svapna Anka 1.*)

४. "हस्त्यश्वरथपदातीनि विजयाङ्गानि ।" (*Pratijnâ Anka 4.*)

५. "दैवप्रामाण्याद् भ्रश्यते वर्धते वा ।" (*Pratijnâ Anka 1.*)

६. "यावदहमुच्छ्वसामि ।" (*Pratijnâ Anka 1.*)

७, "कथमगणितपूर्वं द्रक्ष्यते.........श्रोष्यते ।" (*Pratijnâ Anka 1.*)

८. "प्रथममभिकाङ्क्षे हि मनसा" (*Pratijnâ Anka 2.*)

९. "जित इति पुनरेनं रुष्यते वासुभद्रः ।" (*Pancharâtra Anka 2.*)

१०. "स्त्रीगतां पृच्छसे कथाम्" (*Pancharâtra Anka 2*)

११. "वीजन्तो मलयानिला अपि" (*Abhisheka Anka 3.*)

१२. "सीतां समाश्वासितुम्" (*Abhisheka Anka 7.*)

१३. "ऋज्वायतां च मुखतोरणलोलमालां" (*Svapna Anka 5.*)

The words underlined above have this characteristic, *viz.*, that *Âtmanepada* is used for *Parasmaipada* and *vice versa*. Again, the plural is used for the singular in हस्त्यश्वरथपदातीनि, there is no dropping of शप् in उच्छ्वसामि, while णिच् is dropped in वीजन्तः and समाश्वासितुम्. The च in ऋज्वायतां च is used only for the sake of completing the line. These may, however, be explained away by *Pâniniyas*. Thus, in the second example, आ may not be taken as a preposition, in the third, *Âtmanepada* need not necessarily be used; in the fourth, the expression may be taken as a *Bahuvrîhi* compound (हस्त्यश्वरथसहिताः पदातयः येषु तानीति). In the sixth, गणकार्य is not always operative, in the eleventh वीज् may be taken to belong to the class of पच् to which अ is affixed and क्विप् is added on in the sense of आचार; in the twelfth णिच् is affixed to समाश्वासवत् and is generally dropped; in the thirteenth, च may be used in the sense of तु, and the rest may in some way be explained by resorting to कर्मवद्भाव. In truth, it is no fault of our venerable poet who is a perfect master of the language and who

lived long before the time of *Chânakya*, the contemporary of *Nanda,* not to have followed the rules of *Pânini* who was only a pupil of *Varshopâdhyâya*, another contemporary of *Nanda* ; on the other hand, it only adds grace to its extreme antiquity. It is also possible that some errors might have crept in, as these works which were out of circulation would have passed through the hands of several unlettered scribes.

In the same way, even the defects pointed out by *Bhâmaha* in *Pratijnânâtika*, to which we have already referred, may be explained.

Bhâmaha considers it extremely improbable that such an illustrious king as *Vatsarâja* would have been unaware of his enemies' stratagem in resorting to the fictitious elephant, either through the absence of spies or the negligence of his ministers; or that he would not have been murdered by his infuriated enemies, while he was alone and had fallen into their hands or that he could not have distinguished a fictitious elephant by day. The first statement does not require any serious refutation, for it is quite possible that even a far-sighted king, with all his spies and his devoted and efficient ministers, in his great eagerness for elephant-hunt, might disregard his ministers' advice and proceed alone in haste.

Again, a prudent and generous-minded minister like *Sâlankâyana* could well have prevented the attempted murder of *Vatsarâja* on the grounds that it would be more pleasing to his lord if such a valiant and honourable foe could be taken captive, and that it would be a very mean act to kill a captive who was already stupefied by blows. It must be, for these reasons, that *Bhâmahâchârya* refers to the fictitious elephant as the last ground of his objections; but on a minute examination, even this is of no account, for in *Pratijnânâtikâ, Hamsaka*, in reference to the deception practised upon *Vatsarâja* speaks :—

"तदो दिउणं विअ अद्धाणं गच्छिअ साळुक्खच्छाआए सक्णण-दुणीळदाए परुभासिदेहि असरीरविणिक्खित्तेहि विअ दन्तजुअळेहि सूइदो धणुस्सदमत्तेण विअ दिट्ठो सो दिव्ववारणपडिच्छन्दो ।"

It is clear from the above passage that the place where the fictitious black elephant was posted, was covered with such a

dense forest of *sâla* trees that it was hardly possible to distinguish an elephant. While even the existence of the elephant was left to be inferred only through the tusks, it were hardly likely to conceive, even by day, that it might possibly be a fictitious one. It is, however, clear from *Pratijnânâtikâ* that *Valsarâja's* elephant-hunt must have taken place about mid-day. From this, *Bhâmaha* concludes that, however dense the trees might be, even there, darkness cannot co-exist with mid-day light, that it is thus impossible that an elephant could not be distinguished owing to the density of *sâla* trees; and that such a statement is a mere exaggeration. On the other hand, it seems to us that actual experience shows that there could be total darkness on account of the density of *sâla* trees, in spite of broad day-light. If on the other hand, as narrated in *Kathâsaritsâgara* which is a close copy of *Brihatkathâ*, evening twilight had begun to set in, *Vatsarâja's* erroneous impression becomes more probable; but this ingenious statement does nowhere appear in *Pratijnânâtika*, and it is quite possible that the author of *Brihatkathâ* might have conceived this statement for the sake of repelling *Bhâmaha's* criticisms and *Somadevabhatta* having come across it in *Brihatkathâ* would have inserted it in his own work, *Kathâsaritsâgara**. Everything has thus been rendered clear.

Want of circulation.

That there was a very wide circulation of *Bhâsa's* plays in *Kâlidâsa's* time is evident from his own statement " प्रथितयशसां भाससौमिल्लकविपुत्रादीनाम् ". On the other hand, its circulation had become extremely rare during the time of *Sûdraka*. Thus is to be accounted for the readiness displayed by *Sûdraka* in *Mrichchhakatika* to collect together the various sentences to be found in *Chârudatta*; hence also the wide circultation of *Mrichchhakatika* which is merely an adaptation of another's words. These plays have thenceforward gradually disappeared from circulation and have now become extinct. How is this to be explained? Not, indeed, by the absence of merits, for it has already been shown that the works are so exu-

---

* II. Lambaka, IV. Taranga, XVIII. Sloka.

" गान्धर्वदत्तचित्तत्वात् सन्ध्याध्वान्तवशाच्च सः ।
न तं वनगतं राजा मायागजमलक्षयत् ॥ "

berant with rich ideas and are couched in such felicitous language, as to attract the emulation of poets like *Kâlidâsa*.

Nor can the existence of the aforesaid irregularities of language which are not capable of an easy explanation possibly be the reason; for, even at a time when *Pânini's* Grammar which has become so famous with the aid of such works like the *Vârtika* and *Mahâbhâshya* has attained a very wide currency, when again, there have come into existence authoritative works on Rhetoric composed by *Medharin*, *Bhâmaha* and others, and when scholars have imbibed the habit of closely following them, similar irregularities are met with here and there, as in *Kâlidâsa's* works which have in no way become less popular on that account.

Nor again, can it be due to the omission to mention the poet's name, for *Raghuvamsa*, *Sisupâlavadha* and other works wherein the author's name is not mentioned, have a wide currency.

Hence, some mysterious reason must be assigned for their non-circulation, on the strength of which must be explained the total disappearance till now, except in name, of works like the *Sangraha* of *Achârya Vyâdi* and the *Brihatkathâ* of *Gunâdhya*.

The simultaneous acquisition of a number of *Bhâsa's* very ancient works which have long since been given up for lost, will not fail to be the source of astonishment and delight to all the world, and they will be regarded as an invaluable treasure by Sanskrit and Archaeological scholars. It further generates in me some hope that many other works of *Bhâsa* may be unearthed, for it is nowhere calculated that *Bhâsa's* works are so many in number.

Our profound gratitude is due to the proprietors of Manalikkara Matham and especially to its eldest member, the venerable Sankaranârâyanar for the invaluable help they have rendered in preserving these somewhat worn-out but precious manuscripts which contain a rare collection of *Bhâsa's* works. My hearty thanks are also due to the astrologer Govinda Pisharodi and to Messrs. Subrahmanya Mûttatu (of Puthial) and Krishna Tantri (of Tazhaman) for their kindness in allowing the use of their manuscripts.

Conclusion.

So far, the nature, authorship and the exact period of these Nâtakas have been dealt with. These are the important aspects that have here been considered, and what materials there might be for purposes of ancient history can be ascertained only after a critical study of these works, and is hence left to be discussed after their publication. We first publish *Svapnavâsavadatta*, since it comes first in this collection of dramas and affords the basis for the determination of the authorship etc. of the other plays. *Pratijnâyaugandharâyana* and other works will also be published in due course.

Trivandrum, 11-4-1912.

T. GANAPATI SÂSTRÎ.

PREFACE TO THE FIRST EDITION.

Following the Subhâshita of *Râjasekhara*, this *Nâtaka* has been styled '*Svapnavâsavadatta.*' It can also be termed *Svapnavâsavadattâ* (f) or *Svapnanâtakam* (n). The manuscript of *Svapnavâsavadatta* obtained from the *Manalikkara* Matham is designated क, that sent by Pandit *Anantâchârya* ख, while that of *Krishna* Tantri ग. The differences in reading between the first two are noted at the foot of the page, while those of the third are separately mentioned at the end of the book. The letters that we have inserted in the place of those that have been lost are enclosed within brackets. Wherever any letter seems inappropriate, it is followed by an interrogation mark, and the appropriate letter is inserted, the whole being enclosed in brackets, and in the absence of an appropriate letter, the inappropriate one followed by a quotation-mark is enclosed in brackets. No manuscript contains the छाया for Prakritam and we have supplied it with due care. Foot-notes are added, wherever necessary. The differences in reading in ग Grantha and the words which are lost in क Grantha but are obtained from ख Grantha are noted in the Appendix (at the end of the book).

T. GANAPATI SÂSTRÎ.

PREFACE TO THE SECOND EDITION.

The text of the second edition of the Svapnavâsavadatta was revised with the help of a palm-leaf manuscript of the work recently procured from the Kilimanur Palace Library. This manuscript (marked च) contained some remarkably good readings which were adopted in the body of the work, while other readings were given in the footnotes. It is a complete and mostly correct manuscript in Malayalam character, and appears to be nearly three centuries old. No change was made in the introduction &c., to this edition. The beginning of Karnabhâra, the name of Dutavâkya and its ending, which were not given in the introduction, can be known from the works themselves, which were included in No. xxii of the 'Trivandrum Sanskrit Series.'

Trivandrum, 25-2-1915. } T. GANAPATI SÂSTRÎ.

पाठभेदः ।

पृष्ठं	पङ्क्तिः	मुद्रितपुस्तकपाठः.	ख. पुस्तकादृष्टः ग. पुस्तकपाठः.
२	८,९	ति............वा	ति यौ....णः वा
,,	१०	णः—(कर्णं दत्त्वा) क	णः—क
,,	१४	विस्मितः	निश्चितः
,,	१७	यो....ति	योधर्मोवात्मा विनियोजयति
,,	१८	य्य!....अ	य्य! अ
३	२,३	णः—भवति! एवमनिर्ज्ञातानि दैवतान्यव	णः—एवमविज्ञातानि दैवतान्यप्यव
,,	७	त्र चि	त्र भवत्या चि
,,	१२	भटौ	उभौ
,,	१४	ष	व
,,	१५	पश्य	कुतः
४	५,६,७.	नम् ।.... (उ	नम् । (उ
,,	९	णः—(आत्मगतम्) त	णः—त
५	२	णः—(स्वगतम्) ए	णः—ए
,,	४,५.	ति । ततः, प्र	ति । प्र
,,	१२,१३	(ततः प्रविश....)ता	(प्रविश्य) ता
,,	१३,१४,१५,१६.	ए....प	ए । प
६	१,२.		
,,	३,४.	हं । पद्मावती—भो	हं । वासवदत्ता—(आत्मगतम्) इअं सा राअदारिआ । अभिजणाणुरूवं खु से रूवं । पद्मावती—भो
,,	९	चि.... वरेदि ।	वि.... वारेदि ।
,,	१२	ता—(आत्मगतम्) भो	ता—भो

पृष्ठं	पङ्क्तिः	मुद्रितपुस्तकपाठः.	ख. पुस्तकादृष्टः ग. पुस्तकपाठः.
७	२	दी । इमस्स	री । एदस्स
,,	३	हत्तराणि त्ति....दि ।	हारअत्ति....न्ति ।
,,	४	य्य! किं दि	य्य! दि
,,	७	तं भवत्या । भो	तं भवत्यै । (परिक्रम्य) भो
,,	१०	ते ।	ते । तत् कुर्वताम् ।
,,	१४	क	त
,,	१५, १६	यः ।.... भोः!	यः । भवत्वेवं तावत् करिष्ये । भोः!
८	२	ती—दि	ती—अह्महे दि
,,	४	ण इ	णावि इ
,,	६	णः—इ	णः—श्रूयताम् । इ
,,	६, ७.	कामिमामिच्छा	का । इच्छा
,,	१२	त्ता—(आत्मगतम्) हं	त्ता—हं
,,	१३	मो.... । होदु, अ	मो । होदु, सो अ
,,	१५	पा	प
९	४	किं इ	किं एत्थ इ
,,	५	भणादि	आणवेदि
,,	१०	यः—....अ	यः—अ
,,	११	वतो.... ।	वत्या भवतो भगिन्याः परिपालनम्
,,	१२	तत्रभ	भ
१०	२	दु । अ	दु । अय्या अ
,,	३	जा ईदिसी से आइदी, इअं वि रा	यादिसी से आकिदी इअं रा
१०	७	तम्) हन्त भोः! अ	तम्) अ
,,	१४	त्क	द्र
,,	१७	ष्ये । ....भवतु	ष्ये । भवतु
,,	१८	न भ	नानेन भ
११	२	क्थं	क्था

पृष्ठं	पङ्क्तिः	मुद्रितपुस्तकपाठः.	ख. पुस्तकादृष्टः ग. पुस्तकपाठः.
११	७	(अन्यतो विलोक्य) अथ	अथ
,,	१२	ती—अम्मो प	ती—प
,,	१६	री—(आचम्य) भ	री—भ
१२	५	मे सन्दा	मे दा
,,	६	थ प	थ भोः! प
,,	१६	णः—भवितव्यम्। त	णः—त
,,	१७,१८, १९,२०.	री—तत....स्ता	री—ततस्ता
१३	२,३.		
,,	४	सचिवस्त	अमात्यस्त
,,	९	णः—सत्यं प	णः—प
,,	१३	ज्य राजा मो	ज्य परिष्वज्य मो
१४	९	रः सहसोत्थाय	र उत्थायोत्थाय
१५	६	त्ता—दिट्ठिआ सु	त्ता—सु
,,	८	महद्भारसु	महान् भारतमु
,,	९,१०.	न्। कुतः, स	न्। स
,,	१०	स्य तु श्र	स्य तच्छ्रु
,,	१४,१५.	षितम्,....इत्येवं तं वि	षितम् इत्येवं वि
,,	१६	नममात्यैर्महता य	नं महाय
१६	२	न्तम्। ततो निष्का	न्तमपश्यम्। ततोऽपक्रा
,,	६	णा एव्वं प	णा प
,,	९,१०.	व्व सह म	व्व म
१६	१३	ब्रह्मचारी—तथास्तु (निष्क्रान्तः)	(निष्क्रान्तो ब्रह्मचारी)
१७	४,५.	ण्ठिष्यति। (काञ्चुकीयमवलोक्य) ग	ण्ठयिष्यति। ग
,,	७	यौग....न्तः)	(निष्क्रान्तो यौगन्धरायणः)

पृष्ठं	पङ्क्तिः	मुद्रितपुस्तकपाठः.	ख. पुस्तकाद्दृष्टः ग. पुस्तकपाठः.
१७	११	वन्दामि दाव अ	वन्दामि अ
,, १८	१२,१३. २	हि।.... का	हि। का
१८	२	ति!	त्यः!
१९	४,५	आ माहवीळदाम	आ पदुमावदी माहवीम
,,	५	स्सदो	स्सगदा
,,	,,	त्ति। जाव भ	त्ति। गच्छ तुवं अहं पि भ
,,	६	मि। .... अ	मि। अ
,,	७	क्करिदक	क्कण्ठिअक
,,	८	मुहेण .... की	मुहेण की
,,	१२	ति कन्दुकेन क्रीडन्ती प	ति प
,,	,,	त्तया सह)	त्ता चेटी च)
२०	२	ती—अय्ये! भो	ती—भो
,,	३	त्ता—हळा! अ	त्ता—अ
,,	५	दु दाव भ	दु भ
,,	८,९.	सि। वा....ह	सि। आवन्तिका....ह
२१	७	टी—भट्टिदारिआ ते	टी—ते
,,	१२,१३.	त्ता— ....के	त्ता—के
२२	३	त्ता—(आत्मगतम्) जा	त्ता—जा
,,	१०,११.	इं (प्रकाशम्) ह	इं ह
,,	११	णीओ ज	णीज
,,	१२	ती—जुज्जइ। ण खु ए	ती—अज्ज उण ए
,,	१३	णमणोभि	णाभि
२३	३	त्री—जेदु भट्टिदारिआ। भट्टिदारिए! दि	त्री—भट्टिदारिए! दि
,,	५	स्स।	स्स दिण्णा।
,,	७	त्ता—अह कु	त्ता—हं। (प्रकाशम्) अय्ये! कु

पृष्ठं	पङ्क्तिः	मुद्रितपुस्तकपाठः	ख. पुस्तकादृष्टः ग. पुस्तकपाठः.
२३	८, ९.	सो....अ।	इह आअदो। पडिच्छिदा भट्टिदारिआ।
,,	१३	अ उ	अ पुणो उ
२४	३	न्ति।	न्ति सोअसुण्णाणि।
,,	८	त्ता— ....। अ	त्ता —होद। अ
,,	११	दु दाव अ	दु अ
२५	२	त्ता — (आत्मगतम्)ज	त्ता —ज
,,	४	धात्री —एदु एदु भ	चेटी —पविसदु दाव अब्भन्तरं भ
२६	२	ति विचिन्तयन्ती वा	ति सचिन्ता वा
,,	११	(ततः प्रविशति पुष्पाणि गृहीत्वा चे	(प्रविश्य पुष्पहस्ता) चे
,,	१२,१३	आ।....अ	आ। अ
,,	१३,१४.	रपडिहदचन्दलेहा विअ अ	रगदा विअ पडिवदचन्दलेहा अ
२७	२, ३	य्ये आवन्तिए! को	य्ये! को
,,	५	चेटी	धात्री
,,	६	णा ति। इ	णा आवन्तिआ। इ
,,	१०,११.	त्ता— (आत्मगतम्) एदं वि मए कत्तव्वं आसी।	त्ता—इदं पि मए कादव्वं होइ
,,	११	अहो अक	अक
,,	१२	अय्ये! मा दाणिं अञ्ञं चि	मा दाणिं चि
,,	१२, १३.	एसो जा	जा
,,	१३.	दि। सिग्घं दाव गुम्हदु अय्या।	दि।
२८	२, ३, ४, ५, ६.	त्ता—.... कीदि	त्ता—कीदि

पृष्ठं	पङ्क्तिः	मुद्रितपुस्तकपाठः.	ख. पुस्तकादृष्टः ग. पुस्तकपाठः.
२८	७	ण ईरिसो दि	तादिसो ण दि
,,	८,९.	हि .... ओ ।	हि ।
,,	१०	सअं .... सर	सक्कं भणिदुं स सर
,,	१३	ससङ्कि	सदंसणसङ्कि
२९	२	य्या सिग्घं ।	य्या ।
,,	३	त्ता— .... इ	त्ता—इ
,,	४	मन्द .... विलो	आणेहि दाव । (विलो
,,	६	त्ता— .... इ	त्ता—इ
,,	७	ए अ । .... इ	ए अ । इ
,,	१०	कीस ।	किण्णिमित्तम् ।
३०	३	जामादुओ	भट्टा
,,	५	अइ वदामि । ग	इअं तुवारेमि । भट्टे ! ग
,,	६, ७, ८.	चेटी—....गदा	चेटी निष्क्रान्तापरया सह । गदा
,,	८, ९, १०.	सा....णिद्दं ळ	सा जाव दावणि भाअधेअणिव्वुत्तं दुःखं विणोदेमि । अच्चाहिदं अ-य्यउत्तो वि णाम परकेरओ संवुत्तो। अहं वि दाणि मम सय्याए दुक्खं विणोदेमि णिद्दं ण ळ
३१	३	कः—(सहर्ष) भो !	कः—भो !
,,	९	ए अ	ए उण अ
,,	१०	दोसो .... भुजगोदर (पृ. ३९)	दोसो जगोदर
४०	१२,१३	इमाणि अवइद ....आ-गुच्छआणि प्रेक्खदु दाव भ	इदाणिं पचिद............आणि पे-क्खदु भ
४१	१०, ११, १२, १३.	तः । .... सव्वं	तः । सव्वं
,,	१५	ए ! एदं	ए ! एव्वं करेमि । एदं

पृष्ठं	पङ्क्तिः	मुद्रितपुस्तकपाठः	ख. पुस्तकादृष्टः ग. पुस्तकपाठः.
४२	२,३,४.	हि । .... वि	हि । वि
,,	१३,१४,१५	कः— .... पद्मा	कः—भो! तह । पद्मा
४४	११	वेण स	वेण वि स
,, ४५	१३,१४,१५ २	क्तुम् .... वि	क्तुम् । वि
,,	२,५	किं	कथं
४६	३	ती— .... स	ती—णहि णहि । स
,,	४	जो .... य्याए	जो उवरदाए
,,	९	तदा वा	तदा तत्रभवती वा
४७	७	कः— .... त	कः—का गई । त
,,	८	त्ता मे	त्ता वि मे
४८	६	जा— .... ए	जा—ए
,,	६,७	त्ता अ	त्ता । वयस्य! अ
४९	११,१२.	तुवं .... अ	तुमं । ण युत्तं दाणि उक्कण्ठिअं अय्यं एआइणं विसज्जिअ गन्तुं । अ
५०	२,३,४	मि । .... (प्रविश्य)	मि । (प्रविश्य)
,,	५	कः— .... एसा त	कः—अये त
,,	८	कः—ए	कः—भोदि! इदं । पद्मावती—किं एदं णाम । विदूषकः—ए
५१	९	जा— .... वस	जा—वस
,,	८	धु । .... प	धु । प
,,	११	पद्मावति!	देवि!
५२	२	उइदं	उचिदं
,,	६,७.	दम् । .... गु	दम् । गु
५३	१०	का— .... ग	का—ग
,,	११	हि । के	हि । मा तुवं आणवेदा विअ के
५४	५	इ । क	इ । पद्मिनिका—क
,,	७	पद्मिनिका	मधुकरिका

पृष्ठं	पङ्क्तिः	मुद्रितपुस्तकपाठः.	ख. पुस्तकाद्दृष्टः ग. पुतकपाठः.
५४	७,८.	ण्णा । ग	ण्णा । पद्मिनिका—ग
,,	१०	होदु	करेहि
५५	११,१२	ट्टिणो णिवेदेहि....	ट्टिण्णो सिग्घं णिवेदेहि । निष्क्रा
५६	२,३, ४, ५६.	निष्का	
,,	८	राजा)	राजा सपरिवारः)
६१	४,५,६.	जा — .... मूर्खे	जा—मूर्ख !
६२	३	टी — ए	टी—इह ळहुअदरं ए
६३	४,५.	करिअ .... जाव	करिअ विसज्जिअ णिग्गदा । जाव
,,	५,६,७.	सामि । .... (उप	सामि । (उप
,,	१०	अस्स सू	अस्स आआरेणसू
,,	११	(शयनं नाटयति)	(शेते)
,,	१२	जा— .... हा	जा—हा
,,	१३	त्ता— .... हं	त्ता—हं
६४	२,३.	त्तो । रा	त्तो । मन्दभाआए मए किं किदं । रा
,,	३	हा अवन्तिराजपुत्रि !	वासवदत्ते !
,,	५	त्तो । .... मु	त्तो । भोदु, मु
६५	७	त्ता— ....को वि मं	त्ता—इह को वि जंणो मं
,,	८	ता गमिस्सं ।	ण जुत्तं चिट्ठिदुं
६६	९,१०.	कः— .... उ	कः—मा दाणि अणत्थं चिन्तिअ उ
,,	१०	चिन्त....वे ।	चिन्तिअ दिट्ठा तत्तहोदी विअ ।
,,	१२,१३	जा—य	जा—एवं स्वप्नो मया दृष्टः । य
,,	१४	स्याद्	स्य
,, ६७	,, २,३,४, ५,६.	रम् । .... स्व	रम् । अपिच स्व
,,	७,८,९ १०,११ १२	स्वम् ॥ .... ए	स्वम् । विदूषकः—इमस्सिं राअउळे अवन्तिसुन्दरी णाम जक्खिणी पडिवसदि । सा तुए दिट्ठा भवे । ए

पृष्ठं	पङ्क्तिः	मुद्रितपुस्तकपाठः.	ख. पुस्तकादृष्टः ग. पुस्तकपाठः.
६७	१२,१३.	मो । (प्र	मो । राजा—वयस्य! पश्य पश्य, योऽयं सन्त्रस्तया देव्या तथा बाहुनिपीडितः । स्वप्नेऽप्युत्पन्नसंस्पर्शो रोमहर्षं न मुञ्चति ॥ (प्र
६९	७	तां व	तां महाराजाय व
,,	१५	महाप्पा	मुहप्पा
७०	७	को	कु
७१	४,५,६,७.	मि । .... का	मि । का
,,	९	मिश्रविष्कम्भकः	प्रवेशकः
,,	१२	थं नु	थासु
,,	१८	सुखा	गता
७२	९	शान्तव	शं गत्वा नत्र
७३	४	किन्नुखलु	अहो
७४	५	ती— .... अव	ती—अव
,,	५,६.	त्ति उदासीणं वि	त्ति ण सिळाहणीयं वि
,,	१२	एवमे	सत्यमे
७५	१४,१५,१६	त्रः । .... आ	त्रः । राजा—आ
७६	१६	हृता कन्या	हरन् कन्यां
७७	७	जा— .... कु	जा—कु
७९	१०,११,१२	क्खिअ .... धा	क्खिदुमिच्छामि । धा
८०	९	ती— .... म	ती—म
,,	११,१२,१३	दि । .... रा	दि । अय्या पेक्खिदु सदिसी णव त्ति । रा
८१	६	किन्नु	एष
,,	८	जा—शी	जा—तेन हि शी
,,	१३	ति यौ	ति ब्राह्मणवेषो यौ

पृष्ठं	पङ्क्तिः	मुद्रितपुस्तकपाठः.	ख. पुस्तकादृष्टः	ग. पुस्तकपाठः.
८२	८	जा—श्रु	जा—भोः! श्र	
,,	८,९,१०,११	रः। .... त्व	रः। त्व	
,,	१३	आवन्तिका प्रतीहारी	वासवदत्ता	
८३	९	जेदु	पेक्खदु	
,,	८	तः।	तः, निर्यातय।	
८४	२	किं भवानाह। महासेनपुत्री खल्वेषा।	किमाह भगिनी। ननु वासवदत्ता।	
,,	९	तन्नार्हसि ब	नार्हसि त्वं ब	
,,	१४,१५.	मी। (पादयोः पतति) रा	मी। रा	
,,	१९	जा— (उत्थाप्य) यौ	जा—यौ	
८५	३	ती— .... अय्ये!	ती—अय्ये!	
,,	४	रेण अ	रेण अजाणन्तीए अ	
,,	६	त्ता— .... उ	त्ता—उ	
८६	४,५,६.	नार्थ .... । रा	नार्थं धात्री कञ्चुकी चोज्जयिनीं रा	
,,	७,८.	ह। (भ	ह। यौगन्धरायणः—यदाज्ञापयति स्वामी। (भ	

॥ श्रीः ॥

स्वप्नवासवदत्तादिनाटकचक्रस्योपोद्घातः ।

एतद्राज्यान्तर्गतस्य **पद्मनाभपुरस्योपकण्ठस्थिताद् मणलिक्करमठात्** प्रपूर्वतरके हायने संस्कृतग्रन्थान् संगृह्णन् कतिपयनाटकशालिनं कमपि तालपत्रसम्पुटमहमुपलब्धवान् । तत्र पत्राणि १०५, प्रतिपृष्ठं १० पङ्क्तयः, २० ग्रन्थाश्च । लिपिस्तु प्राचीनकैरली । तत्र त्रिशताधिकवर्षवृद्धत्वप्रतिभासेऽपि पत्रेषु न जीर्णिकृतोऽक्षरविलोपः, ऋते द्वादशभ्य आदितः पत्रैकदेशेभ्यः । अर्थोदारगम्भीरता गद्यपद्यवाक्यरचनारीतिर्वा तत्रापि महाग्रन्थसाधारणी प्रसिद्धमहाकविग्रन्थापेक्षया रोचनीयतरा च मे प्रतिभाता । ततः परीक्षिते तस्मिन् ग्रन्थसम्पुटे दश रूपकाण्यधोदत्तनामान्यदृश्यन्त

अपूर्वनाटकचक्रलाभः ।

१ स्वप्ननाटकम् ।	६ अविमारकम् ।
२ प्रतिज्ञानाटिका ।	७ बालचरितम् ।
३ पञ्चरात्रम् ।	८ मध्यमव्यायोगः ।
४ चारुदत्तम् ।	९ कर्णभारम् ।
५ दूतघटोत्कचम् ।	१० ऊरुभङ्गम् ।

एकादशमपि किञ्चिद् रूपकमुपक्रान्तं तत्रास्ति, यदीयप्रथमपत्रोत्तरपृष्ठस्यार्धपङ्क्त्यवस्थाने लिपिः परिसमापिता । अथापरस्यां यात्रायां **कटितुरुत्तिसमीपवासिनः कैलासपुराभिजनस्य गोविन्दपिषारोटिनाम्नो** ज्यौतिषिकस्य सकाशादभिषेकनाटकं **प्रतिमानाटकमिति** द्वे नाटके पूर्वोक्तनाटकसजातीये अधिगते । एतदधिगमानन्तरमेवैनयोरेकैकस्य प्रतिरूपस्य राजकीयग्रन्थशालायामपि सत्तावधारिता । एतेऽपि ग्रन्थसम्पुटास्तालपत्रात्मकाः केरलीयलिपयस्त्रिचतुरशतवर्षवृद्धसम्भाव्याश्च । एवं तावददृष्टचराण्यश्रुतचराणि च द्वादश (अथवा त्रयोदश) रूपकाण्युपलब्धानि ।

आदौ नान्दीं प्रयुज्य 'नान्द्यन्ते सूत्रधार' इति कथनं नाटकेष्वौत्सर्गिकम् । एषु तु 'नान्द्यन्ते ततः प्रविशति सूत्रधार' इत्यादावुपक्रम्य ततो मङ्गलश्लोको लिख्यत इत्येषा रीतिः; प्रस्तावनापदस्थाने च स्थापनापदस्य प्रयोगः । शूद्रककालिदासादिप्रणीतेषु सर्वेषु नाटकेषु प्रस्तावनायां कविकाव्ययोर्नामनिर्देशः केषुचित् स्तुतिश्च प्रस्तावनाङ्गतया वितन्येते; एतेषु पुनर्नाटकेषु कवेः काव्यस्य वा नाममात्रमपि स्थापनायां न कीर्त्यते । 'अस्माकं*राजश्रेष्ठः कृत्स्नां भूमिं प्रशास्तु' इति वा 'अस्माकं राजा भूमिं प्रशास्तु' इति वा काचित् प्रार्थनामुद्रा भरतवाक्ये नियमेन निवेशिता । अन्ते अमुकनाटकमवसितमिति नाटकनामधेयं सर्वत्र लिखितमस्ति । त इमे व्यतिरेका अधस्तादुदाहृतेभ्यः स्वप्ननाटकादीनामारम्भ--समाप्तिवाक्येभ्यः स्पष्टमवगन्तुं शक्याः । तत्र यथा स्वप्ननाटकस्य (आरम्भवाक्यम्) —

नाटकप्रस्थानरीतिः ।

" (नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः —

उदयनवेन्दुसवर्णावासवदत्ताबलौ बलस्य त्वाम् ।
पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम् ॥

एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग ! पश्यामि ।

(नेपथ्ये)

उस्सरह उस्सरह अय्या ! उस्सरह ।

सूत्रधारः — भवतु, विज्ञातम् ।

भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः ।
धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः ॥

(निष्क्रान्तः)

स्थापना । "

* 'राजसिंहः प्रशास्तु नः' इत्यत्र राजसिंहपदं राजश्रेष्ठार्थकम् । पह्लवेषु राजसु कश्चिद् राजसिंहसंज्ञो राजा यद्यपि श्रुतः, तथापि तस्य क्रैस्तवर्षारम्भोत्तरकालिकत्वान्नाटकचक्रकर्तुः क्रैस्तवर्षारम्भप्राक्तनतायाः साधयिष्यमाणत्वाच्च न राजसिंहशब्दस्य तत्परत्वं युक्तमित्यभिप्रायः ।

(समाप्तिवाक्यम्) —

"(भरतवाक्यम्)

इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् ।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः ॥

षष्ठोऽङ्कः ।

स्वप्ननाटकमवसितम् ॥"

यथा **प्रतिज्ञानाटिकायाः** (आरम्भवाक्यम्) —

"(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः —

पातु वासवदत्तायो महासेनोऽतिवीर्यवान् ।
वत्सराजस्तु नाम्ना सशक्तिर्यौगन्धरायणः ॥

(परिक्रम्य नेपथ्याभिमुखमवलोक्य)

आर्ये ! इतस्तावत् ।

(प्रविश्य)

नटी — अय्य ! इअह्मि ।

सूत्रधारः — आर्ये ! गीयतां तावत् किञ्चिद्वस्तु । ततस्तव गीतप्रसाधिते रङ्गे वयमपि प्रकरणमारभामहे । आर्ये ! किमिदं चिन्त्यते ननु गीयते ।

नटी — अज्ज ! मए सिविणे णादिकुळस्स अस्सत्थं विअ दिट्ठं । ता इच्छामि अय्येण कुसळविण्णाणणिमित्तं कञ्चि पुरुसं पेक्खिदुं ।

सूत्रधारः — बाढम् ।

पुरुषं प्रेषयिष्यामि व्यक्तमात्महिते क्षमम् ।

(नेपथ्ये)

सालक ! सज्जस्त्वम् ।

सूत्रधारः—

पुरुषं प्रेषयत्येष यथा यौगन्धरायणः ।

(निष्क्रान्तौ)

स्थापना ।"

(समाप्तिवाक्यम्)—

"(भरतवाक्यम्)

भवन्त्वरजसो गावः परचक्रं प्रशाम्यतु ।
इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः ॥

(निष्क्रान्ताः सर्वे)

चतुर्थोऽङ्कः ।

प्रतिज्ञानाटिकावसिता ॥"

यथा पञ्चरात्रस्य (आरम्भवाक्यम्)—

"(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—

द्रोणः पृथिव्यर्जुनभीमदूतो यः कर्णधारः शकुनीश्वरस्य ।
दुर्योधनो भीमयुधिष्ठिरः स पायाद् विराडुत्तरगोऽभिमन्युः ॥

(परिक्रम्य) एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग ! पश्यामि ।

(नेपथ्ये)

अहो कुरुराजस्य यज्ञसमृद्धिः ।

सूत्रधारः— भवतु, विज्ञातम् ।

सर्वैरन्तःपुरैः सार्धं प्रीत्या प्राप्तेषु राजसु ।
यज्ञो दुर्योधनस्यैष कुरुराजस्य वर्तते ॥

(निष्क्रान्तः)

स्थापना ।"

(समाप्तिवाक्यम्)—

"द्रोणः—

इत्यर्थं वयमानीताः पञ्चरात्रोऽपि वर्तते ।
धर्मेणावर्जिता भिक्षा धर्मेणैव प्रदीयताम् ॥

दुर्योधनः—

बाढं दत्तं मया राज्यं पाण्डवेभ्यो यथापुरम् ।
मृतेऽपि हि नराः सर्वे सत्ये तिष्ठन्ति तिष्ठति ॥

द्रोणः—

हन्त सर्वे प्रसन्नाः स्मः प्रवृद्धकुलसङ्ग्रहाः ।
इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः ॥

(निष्क्रान्ताः सर्वे)

तृतीयोऽङ्कः ।

अवसितं पञ्चरात्रम् ॥"

यथा **चारुदत्तनाटकस्य** (आरम्भवाक्यम्)—

"(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—किण्णुखु अज्ज पच्चूस एव्व णिक्खन्तस्स बुभुक्खाए पुक्खरपत्तपडिदजळबिन्दू विअ चञ्चळाअन्ति विअ मे अक्खीणि । (परिक्रम्य) जाव गेहं गच्छिअ जाणामि किण्णुहु संविधा विहिदा ण वेत्ति । एदं अह्माणं गेहं । जाव पविसामि । (प्रविश्यावलोक्य) जह ळोहीपरिवट्टणका-ळसारा भूमी णेउब्भामणसुगन्धो विअ गन्धा सुणिमित्तं विअ परिब्भम-न्तो वाडवस्सअजणो । किण्णुखु संविधा विहिदा । आदु बुभुक्खाए ओदणमअं विअ जीवळोअं पेक्खामि । अय्ये ! इदो दाव ।

नटी— अय्य ! इअह्मि । अय्य ! दिट्ठिआ खु सि आअदो ।

सूत्रधारः— अय्ये ! किं अत्थि अह्माणं गेहे को वि पादरासो ।

नटी — अत्थि ।

सूत्रधारः — चिरं जीव । एवं सोभणाणि दत्तिआ होहि ।

नटी — अय्य! तुवं एव्व पडिवाळेन्ती चिट्ठामि ।

सूत्रधारः — अय्ये! किं अब्भत्थिदं ।

नटी — अत्थि ।

सूत्रधारः — एवं देवा तुमं अस्सासन्तु । अय्ये! किं किं ।

नटी — घिदं, गुळं, दहि, तण्डुला अत्थि ।

सूत्रधारः — एदं सव्वं अह्माणं गेहे अत्थि ।

नटी — णहि णहि, अन्तळावणे ।

सूत्रधारः — (सरोषम्) आः अणय्ये! एवं दे आसा छिन्दीअदु । अभावं च गमिस्ससि । अहं चण्डप्पवादलण्डुओ विअ वरण्डा पच्चादादो दूरं आरोविअ पाडिदोह्मि ।

नटी — मा भाआहि मा भाआहि । मुहुत्तअं पडिवाळेदु अय्यो । सव्वं सज्जं भविस्सदि । छड्ढं णाम एदं । अज्ज मम उववासस्स अय्यो सहाओ होदु ।

सूत्रधारः — किण्णामहेओ अय्याए उववासो ।

नटी — अभिरूववदी णाम ।

सूत्रधारः — किं अण्णजादीए ।

नटी — आम ।

सूत्रधारः — सव्वं दाव चिट्ठदु । कोणु दाणि अय्याए उववासस्स उवदेसिओ ।

नटी — इमिणा पडिवस्सएण चुण्णगोट्ठेण ।

सूत्रधारः — साहु चुण्णगोट्ठ! साहु ।

नटी — जइ अय्यस्स अणुग्गहो, तदो इच्छेअं अह्मारिसजणजोग्गं कञ्चि बह्मणं णिमन्तेदं ।

सूत्रधारः— धम्मिट्ठो खु णिओओ । तेण पादरासो वि मे भविस्सदि । जइ एव्वं पविसदु अय्या । अहं वि अह्मारिसजणजोग्गं कञ्चि बह्मणं अण्णेसामि ।

नटी — जं अय्यो आणवेदि । (निष्क्रान्ता)

सूत्रधारः— किण्णुखु दरिद्दबह्मणं ळभेअं । (विलोक्य) एसो अय्यचारुदत्तस्स वअस्सो अय्यमेत्तेओ णाम बह्मणो इदो एव्व आअच्छदि । जाव उवणिमन्तेमि । (परिक्रम्य) अय्य ! णिमन्तिदो सि । आमन्तणस्स मा दरिद्दत्ति अवमण्णेहि । सम्पण्णं अह्लिदव्वं भविस्सदि । घिदं, गुळं, दहिं, तण्डुला अ सव्वं अत्थि । अविअ दक्खिणामासआणि भविस्सन्ति ।

(नेपथ्ये)

अण्णं अण्णं णिमन्तेदु दाव भवं । दरिद्दओ दाव अहं ।

सूत्रधारः —

घिदगुळदहिसुसमिद्धं धूविअमूवोपदंससंभिण्णं ।
सक्कारदत्तमिट्टं भुञ्जीअदु भत्तमय्येण ॥

(निष्क्रान्तः)

स्थापना ।"

(समाप्तिवाक्यम्)

"**गणिका**— एहि इमं अळङ्कारं गह्निअ अय्यचारुदत्तं अहिसरिस्सामो ।

चेटी — अज्जुए ! तह । एदं पुण अभिसारिआसहाअभूदं दुद्दिणं उण्णमिदं ।

गणिका — हदासे ! मा खु वड्ढावेहि ।

चेटी — एदु एदु अज्जुआ ।

(इति निष्क्रान्ते)

चतुर्थोऽङ्कः ।

अवसितं चारुदत्तम् ॥"

यथा दूतघटोत्कचस्य (आरम्भवाक्यम्)—

"(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—

नारायणस्त्रिभुवनैकपरायणो वः
पायादुपायगतयुक्तिकरः सुराणाम् ।
लोकत्रयाविरतनाटकतन्त्रवस्तु-
प्रस्तावनप्रतिसमापनसूत्रधारः ॥

एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग ! पश्यामि ।

(नेपथ्ये)

भो ! भोः ! निवेद्यतां निवेद्यतां तावत् ।

सूत्रधारः—भवतु, विज्ञातम् । एष खलु संशप्तकानीकनिवाहिते जनार्दनसहाये धनञ्जये तदनन्तरमुपगतभीष्मवधामर्षितैर्धार्तराष्ट्रैः परिवार्य निहतः कुमारोऽभिमन्युः । तथाहि—

यान्त्यर्जुनप्रत्यभियानभीता यतोऽर्जुनस्तां दिशमीक्षमाणाः ।
नराधिपाः स्वानि निवेशनानि सौभद्रबाणाङ्कितनष्टसंज्ञाः ॥

(निष्क्रान्तः)

स्थापना ।"

(समाप्तिवाक्यम्)—

"**घटोत्कचः**—पितामह ! एष गच्छामि ।

धृतराष्ट्रः—पौत्र ! गच्छ गच्छ ।

घटोत्कचः—भो भो राजानः ! श्रूयतां जनार्दनस्य पश्चिमसन्देशः ।

धर्मं समाचर कुरु स्वजनव्यपेक्षां
यत् काङ्क्षितं मनसि सर्वमिहानुतिष्ठ ।

जात्योपदेश इव पाण्डवरूपधारी
सूर्यांशुभिः सममुपैष्यति वः कृतान्तः ॥

(इति निष्क्रान्ताः सर्वे)

दूतघटोत्कचमवसितम् ॥"

यथाविमारकस्य (आरम्भवाक्यम्)—

"(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—

उत्क्षिप्तां सानुकम्पं सलिलनिधिजलादेकदंष्ट्राग्ररूढा-
माक्रान्तामाजिमध्ये निहतदितिसुतामेकपादावधूताम् ।
सम्भुक्तां प्रीतिपूर्वं स्वभुजवशगतामेकचक्राभिगुप्तां
श्रीमान् नारायणस्ते प्रदिशतु वसुधामुच्छ्रितैकातपत्राम् ॥

(नेपथ्याभिमुखमवलोक्य) आर्ये! इतस्तावत् ।

(प्रविश्य)

नटी—अय्य! इअह्मि ।

सूत्रधारः—आर्ये! तव वदनजनितकौतूहलेन स्मितेन निवेदित इवान्तर्गतो भावः । ननु किञ्चिद् वक्तुकामासि ।

नटी—को एत्थ विम्हओ, अय्यो भावण्णो त्ति ।

सूत्रधारः—तेन हि स्वैरमभिधीयताम् ।

नटी—इच्छेमि अय्येण सह उय्याणं गन्तुं । अत्थि मे तहिं इत्थिआकरणीअं णिअमकय्यं ।

(नेपथ्ये)

भूतिक! त्वमप्युद्यानं गच्छ कुरङ्गीरक्षणार्थं म(द)भावस्थो ह्यञ्जनगिरिः ।

सूत्रधारः—आर्ये! ननु भवत्या श्रुतम् उद्यानं गता राजपुत्रीति । तस्मात् सम्प्रति सर्वतः परिगुप्तानि भवन्त्युद्यानानि । प्रतिनिवृत्तायां राजसुतायां स्वैरं गमिष्यावः ।

नटी — जं अय्यो आणवेदि ।

(निष्क्रान्तौ)

स्थापना ।"

(समाप्तिवाक्यम्) —

"(भरतवाक्यम्)

भवन्त्वरजसो गावः परचक्रं प्रशाम्यतु ।
इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः ॥

(निष्क्रान्ताः सर्वे)

षष्ठोऽङ्कः ।

अविमारकस्य षष्ठोऽङ्कः । एषोऽवसितश्च ॥"

अथ **बालचरितस्य** (आरम्भवाक्यम्) —

"(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः —

शङ्खक्षीरवपुः पुरा कृतयुगे नाम्ना तु नारायण-
स्त्रेतायां त्रिपदार्पितत्रिभुवनो विष्णुः सुवर्णप्रभः ।
दूर्वाश्यामनिभः स रावणवधे रामो युगे द्वापरे
नित्यं योऽञ्जनसन्निभः कलियुगे वः पातु दामोदरः ॥

एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग ! पश्यामि ।

(नेपथ्ये)

अहं गगनसञ्चारी ।

सूत्रधारः — भवतु, विज्ञातम् ।

पतत्यसौ पुष्पमयी च वृष्टिर्नदन्ति तूर्याणि च देवतानाम् ।
द्रष्टुं हरिं वृष्णिकुले प्रसूतमभ्यागतो नारद एष तूर्णम् ॥

(निष्क्रान्तः)"

(समाप्तिवाक्यम्)—

"(भरतवाक्यम्)

इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् ।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः ॥

पञ्चमोऽङ्कः ।

अवसितं बालचरितम् ॥"

यथा **मध्यमव्यायोगस्य** (आरम्भवाक्यम्)—

"(ततः प्रविशति सूत्रधारः)

सूत्रधारः—

पायात् स वोऽसुरवधूहृदयावसादः
पादो हरेः कुवलयामलखड्गनीलः ।
यः प्रोद्यतस्त्रिभुवनैकमणे रराज
वैदूर्यसंक्रम इवाम्बरसागरस्य ॥

एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग ! पश्यामि ।

(नेपथ्ये)

भोस्तात ! कोनुखल्वेषः ।

सूत्रधारः— भवतु, विज्ञातम् ।

भोःशब्दोच्चारणादस्य ब्राह्मणोऽयं न संशयः ।
त्रास्यते निर्विशङ्केन केनचित् पापचेतसा ॥

(नेपथ्ये)

भोस्तात ! कोनुखल्वेषः ।

सूत्रधारः—हन्त दृढं विज्ञातम् । एष खलु पाण्डवमध्यमस्यात्मजो हिडिम्बारणिसम्भूतो राक्षसाग्निरकृतवैरं ब्राह्मणजनं वित्रासयति । भोः! कष्टं

कष्टं खलु पत्नीसुतपरिवृतस्य ब्राह्मणस्य वृत्तान्तः। अत्र हि—

श्रान्तैः सुतैः परिवृतस्तरुणैः सदारो
वृद्धो द्विजो निशिचरानुचरः स एषः।
व्याघ्रानुसारचरितो वृषभः सधेनुः
सन्त्रस्तवत्स इव (चा)कुलतामुपैति ॥

(निष्क्रान्तः)

स्थापना।"

(समाप्तिवाक्यम्)—

"**भीमसेनः**—हिडिम्बे! इतस्तावत्। वत्स घटोत्कच! इतस्तावत्। तत्रभवन्तं केशवदासमाश्रमपदद्वारमात्रमपि सम्भावयिष्यामः।

यथा नदीनां प्रभवः समुद्रो यथाहुतीनां प्रभवो हुताशः।
यथेन्द्रियाणां प्रभवं मनोऽपि तथा प्रभुर्नो भगवानुपेन्द्रः॥

(निष्क्रान्ताः सर्वे)

मध्यमव्यायोगोऽवसितः॥"

यथा **कर्णभारस्य** * (समाप्तिवाक्यम्)—

"**कर्णः**—अये शब्द इव श्रूयते किन्नुखल्विदम्।

शङ्खध्वनिः प्रलयसागरतुल्यघोषः
कृष्णस्य वा ननु भवेत् स तु फल्गुनस्य।
नूनं युधिष्ठिरपराजयकोपितात्मा
पार्थः करिष्यति यथाबलमद्य युद्धम्॥

---

* अस्य स्थापनाप्रकरणं न दृश्यते।

शल्यराज! यत्रासावर्जुनस्तत्रैव चोद्यतां मम रथः ।

शल्यः — बाढम् ।

(निष्क्रान्तौ)

कर्णभारमवसितम् ॥"

यथा ऊरुभङ्गस्य (आरम्भवाक्यम्)—

" (नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः —

भीष्मद्रोणतटां जयद्रथजलां गान्धारराजह्रदां
कर्णद्रौणिकृपोर्मिनक्रमकरां दुर्योधनस्रोतसम् ।
तीर्णः शत्रुनदीं शरासिसिकतां येन प्लवेनार्जुनः
शत्रूणां तरणेषु वः स भगवानस्तु प्लवः केशवः ॥

एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग! पश्यामि ।

(नेपथ्ये)

एते स्मो भो! एते स्मः ।

सूत्रधारः — भवतु, विज्ञातम् ।

....

....

स्थापना ।"

(समाप्तिवाक्यम्)—

बलदेवः—

याम्येष सज्जनधनानि तपोवनानि

धृतराष्ट्रः—

पुत्रप्रणाशविफलं हि धिगस्तु राज्यम् ।

अश्वत्थामा —

यातोऽद्य सौप्तिकवधोद्यतबाणपाणि-
र्गां पातु नो नरपतिः शमितारिपक्षः ॥

(निष्क्रान्ताः सर्वे)

ऊरुभङ्गमवसितम् ॥"

यथानवगतनामकस्य नाटकस्यारम्भवाक्यानि —

" (नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—

पादः पायादुपेन्द्रस्य सर्वलोकोत्सवः स वः ।
व्याविद्धो नमुचिर्येन तनुताम्रनखेन खे ॥

एवमार्यमिश्रान् विज्ञापयामि । किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग ! पश्यामि ।

(नेपथ्ये)

भो भोः प्रतिहाराधिकृताः ! महाराजो दुर्योधनः समाज्ञापयति ।

सूत्रधारः— भवतु, विज्ञातम् ॥

उत्पन्ने धार्तराष्ट्राणां विरोधे पाण्डवैः सह ।
पर्येति मन्त्रशालायां भृत्यो दुर्योधनाज्ञया ॥

(निष्क्रान्तः)

स्थापना ।"

(ततः प्रविशति काञ्चुकीयः)

भो भोः प्रतिहाराधिकृताः ! महाराजो दुर्योधनः समाज्ञापयति — अद्य सर्वपार्थिवैः सह मन्त्रयितुमिच्छामि । तदाहूयन्तां सर्वे राजान इति । अये अयं महाराजो दुर्योधन इत एवाभिवर्तते । य एषः,

श्यामो युवा सितदुकूलकृतोत्तरीयः
सच्छत्रचामरवरो रचिताङ्गरागः ।
श्रीमान् विभूषणमणिद्युतिरञ्जिताङ्गो
नक्षत्रमध्य इव पर्वगतः शशाङ्कः ॥

(ततः प्रविशति दुर्योधनः)

दुर्योधनः—

उद्भूतरोषमिव मे हृदयं सहर्षं
प्राप्तं रणोत्सवमिमं सहसा विचिन्त्य ।
इच्छामि पाण्डवबले वरवारणाना-
मुत्कृत्तदन्तमुसलानि मुखानि कर्तुम् ॥

काञ्चुकीयः—जयतु महाराजः । महाराजशासनात् समानीतं सर्वराजमण्डलम् ।

दुर्योधनः—सम्यक् कृतम् । प्रविश त्वमवरोधनम् ।

काञ्चुकीयः—यथाज्ञापयति महाराजः । (निष्क्रान्तः)

दुर्योधनः—आर्यौ ! वैकर्णवर्षदेवौ ! उच्यताम्—अस्ति ममैकादशाक्षौहि(णीः?णि) । बलसमुदयस्यास्य कः सेनापतिर्भवितुमर्हतीति । किमाहतुर्भवन्तौ—महान् खल्वयमर्थः । मन्त्रयित्वा वक्तव्यमिति । सदृशमेतद्, आगम्यतां मन्त्रशालामेव प्रविशामः । आचार्य ! अभिवादये । प्रविशतु भवान् मन्त्रशालाम् । पितामह ! अभिवादये । प्रविशतु भवान् मन्त्रशालाम् । मातुल ! अभिवादये । प्रविशतु भवान् मन्त्रशालाम् । आर्यौ ! वैकर्णवर्षदेवौ ! प्रविशतां भवन्तौ । भो भोः सर्वक्षत्रियाः ! स्वैरं प्रविशन्तु भवन्तः । वयस्य ! कर्ण ! प्रविशावस्तावत् । (प्रविश्य) आचार्य ! एतदासनमास्यताम् । पितामह ! एतदा(सनमा)स्यताम् । मातुल ! एतदासनमास्यताम् । आर्यौ ! वैकर्णवर्षदेवौ ! आसातां भवन्तौ । भो भोः सर्वक्षत्रियाः ! स्वैरमासतां भवन्तः । किमिति किमिति महाराजो नास्त इति । अहो सेवाधर्मः । भवत्वय*"

यथा **अभिषेक**नाटकस्य (आरम्भवाक्यम्)—

"(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—

यो गाधिपुत्रमखविघ्नकराभिहन्ता
युद्धे विराधखरदूषणवीर्यहन्ता ।

---

* एतदक्षरावधिक एव ग्रन्थ उपलब्धः ।

दर्पोद्यतोल्बणकबन्धकपीन्द्रहन्ता
पायात् स वो निशिचरेन्द्रकुलाभिहन्ता ॥

एवमार्यमिश्रान् विज्ञापयामि । (परिक्रम्यावलोक्य) अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग! पश्यामि ।

(नेपथ्ये)

सुग्रीव! इत इतः ।

....

....

स्थापना ।"

(समाप्तिवाक्यम्)-

"(भरतवाक्यम्)

भवन्त्वरजसो गावः परचक्रं प्रशाम्यतु ।
इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः ॥

(निष्क्रान्ताः सर्वे)

सप्तमोऽङ्कः ।

अभिषेकनाटकं समाप्तम् ॥"

यथा च **प्रतिमानाटकस्य** (आरम्भवाक्यम्)-

"(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः—

सीताभवः पातु सुमन्त्रतुष्टः सुग्रीवरामः सहलक्ष्मणश्च ।
यो रावणार्यप्रतिमश्च देव्या विभीषणात्मा भरतोऽन्यसर्गः ॥

(नेपथ्याभिमुखमवलोक्य) आर्ये! इतस्तावत् ।

(प्रविश्य)

नटी—अय्य! इअह्मि ।

सूत्रधारः — आर्ये! इममेवेदानीं शरत्कालमधिकृत्य गीयतां तावत् ।

नटी — अय्य! तह । (गायति)

सूत्रधारः — अस्मिन् हि काले,

चरति पुलिनेषु हंसी काशांशुकवासिनी सुसंहृष्टा ।

(नेपथ्ये)

अय्य! अय्य!

सूत्रधारः — भवतु, विज्ञातम् ।

मुदिता नरेन्द्रभवने त्वरिता प्रतिहाररक्षीव ॥

(निष्क्रान्तौ)

स्थापना ।"

(समाप्तिवाक्यम्)—

"(भरतवाक्यम्)

यथा रामश्च जानक्या बन्धुभिश्च समागतः ।
तथा लक्ष्म्या समायुक्तो राजा भूमिं प्रशास्तु नः ॥

(निष्क्रान्ताः सर्वे)

सप्तमोऽङ्कः ।

प्रतिमानाटकं समाप्तम् ॥"

नाटकानां मिथः संवादः ।

एषां नाटकानामुपदर्शितेन नाटकान्तरविलक्षणेन प्रस्थानेन न केवलं, किन्तु केषुचिन्नाटकेषु वाक्यानुपूर्व्यैक्येनापि परस्परसाम्यमुदाहृतवाक्येभ्यः प्रकाशते । तथाहि — "एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग ! पश्यामि" इत्येषाऽऽनुपूर्वी **प्रतिज्ञा-चारुदत्त-अविमारक-प्रतिमा-कर्णभार-नाटकान्यपहाय** सर्वेष्वन्येषु दृश्यते ।

"इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् ।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः ॥"

इति भरतवाक्यानुपूर्वी **स्वप्ननाटकबालचरितयोः** समाना ।

"भवन्त्वरजसो गावः परचक्रं प्रशाम्यतु ।
इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः ॥"

इत्यानुपूर्वी **प्रतिज्ञा-अविमारक-अभिषेकनाटकेषु** लक्ष्यते । " इमामपि महीं कृत्स्नां राजसिंहः पशास्तु नः " इत्यानुपूर्वी **पञ्चरात्रे**ऽप्यस्ति ।

मङ्गलश्लोके नाटकीयप्रधानपात्रनामविन्यासः **स्वप्ननाटक** इव **प्रतिज्ञा-पञ्चरात्रप्रतिमा**नाटकेषूपलभ्यते ।

"लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥"

इत्ययं श्लोकश्चारुदत्तप्रथमाङ्क इव **बालचरित**प्रथमाङ्के दृश्यते । " किं वक्ष्यतीति हृदयं परिशङ्कितं मे " इत्ययं श्लोकपादः **स्वप्नवासवदत्त**षष्ठाङ्क इव **अभिषेक**नाटकचतुर्थाङ्क उपलभ्यते । " धर्मस्नेहान्तरे न्यस्ता " इत्ययं श्लोकपादः **प्रतिज्ञा**नाटिकाद्वितीयाङ्क इवा**भिषेक**नाटकषष्ठाङ्केऽप्यस्ति । एवञ्जातीयका अन्येऽप्युक्तिभङ्गीनां संवादा एषु नाटकेषु दृश्याः ।

एवं परस्परात्यन्तसंवाददर्शनाद् एतैर्नाटकैरेककविकर्तृकैर्भाव्यमिति, प्रस्तावनायां कविकाव्यनामानाख्यानात् तदाख्याननियमारम्भात् प्रागेवैतान्युद्भूतानीति, उदाहरिष्यमाणकवितागुणसमृद्ध्यनुरोधादेषां कर्ता सुप्रसिद्धः पुरातनः कश्चिद् महाकविर्भवितुमर्हतीति च मम बुद्धिरुत्पन्ना । अनया **वत्सराजगतवासवदत्ता**विषयस्वप्नवर्णनात् **स्वप्ननाटक**मिदमाचार्या**भिनवगुप्तपादा**दिप्राचीनग्रन्थेभ्यो नाममात्रेणास्माभिर्विज्ञातं यत् **स्वप्नवासवदत्तं** नाम नाटकं, तदेव नामैकदेशग्रहगृहीतं स्यादिति सम्भावनया चास्मिन् **स्वप्ननाटका**दिनाटकचक्रे भक्तिबहुमानावसामान्यौ मे सञ्जातौ । **स्वप्नवासवदत्तस्य** हि अलभ्यमित्यद्ययावदवधारितस्य प्रणेता श्री**भास**महाकविरित्ययमर्थः

नाटककर्तृनिर्णयः ।

"भासनाटकचक्रेऽपिच्छेकैः क्षिप्ते परीक्षितुम् ।
स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः ॥"

इति **राजशेखरश्लोकात्** **सूक्तिमुक्तावलिगतादवगत** एव सर्वलोकस्य । एष एव खलु महाकविः **मालविकाग्निमित्रप्रस्तावनायां** "प्रथितयशसां **भाससौमिल्लकविपुत्रादीनां** प्रबन्धानतिक्रम्य" इति **श्रीकालिदासेन**,

"सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः ।
सपताकैर्यशो लेभे भासो देवकुलैरिव ॥"

इति **हर्षचरिते भट्टबाणेन** चोपश्लोकितः । एवमेषां **भासकृतित्वे** सिद्धे "सूत्रधारकृतारम्भैरि"ति **भट्टबाणोक्तं** सूत्रधारकृतारम्भत्वं भासकृतीनामसाधारण एव धर्मः कामं प्रत्येतुं शक्यः, एषु सर्वेष्वपि नाटकेषु "नान्द्यन्ते ततः प्रविशति सूत्रधार" इत्येव ग्रन्थारम्भस्य **कालिदासादि**नाटकविलक्षणस्य दर्शनात् ।

आदर्शान्तरलाभः ।

तत इमान्यपूर्वाणि संमुद्रय प्रकाशयितुमिच्छता मया तेषु सुप्रसिद्धनाम्नि **स्वप्नवासवदत्ते** बहुषु पत्रेष्वक्षराणां त्रुटिततया, **चारुदत्तस्य** चतुर्थाङ्कावधिकत्वेनासमग्रतया, **कर्णभारस्य** स्थापनादिविकलतया च तेषां नाटकानां समग्रस्वरूपसम्पादनाय मातृकान्तरान्वेषणे प्रयत्नः कृतः । **भारते** **युरोपदेशे** च तदर्थं बहून् पण्डितान् लेखद्वारेणायाचिषि । चिरप्रनष्टानां **भासकृतीनामीदृशविकलैकमातृकालाभ** एव परमलाभो मन्तव्य इति बोधयन्तो यद्यपि बहवः प्रतिलेखा आयाताः, तथापि **स्वप्ननाटकस्य** **प्रतिज्ञायौगन्धरायणस्य** चैकमादर्शान्तरमशुद्धमपि दिष्ट्या समग्रं मम हस्तं प्राप्तम् । तद्धि **वञ्जूरपुरे** पुरातनवस्तुविचारकार्यालयपण्डितेन श्रीमता **आ-सूरि-अनन्ताचार्येण** मत्प्रियसुहृदा कुतश्चित् केरलीयतदादर्शस्य प्रतिशरीरात् प्रतिलेखितं कृपया मह्यं प्रेषितम् । अस्य **स्वप्ननाटकादर्शस्यान्ते** "**स्वप्नवासवदत्ता** समाप्ता" इत्यस्मत्सम्भावितचरनामधेयानुगुणमेव नामधेयं लिखितं दृष्टम् । **प्रतिज्ञानाटिकादर्शस्यान्ते** च "**प्रतिज्ञायौगन्धरायणम्**" इति पूर्णनामधेयं लिखितम् ।

अस्योपमातृकालाभस्यानुपदं क्वचिद् यात्रायां हरिप्पाट्टुपुरे **पुत्तियल्-सुब्रह्मण्यशर्म**सकाशाद् **अविमारकस्य** मातृकान्तरं किञ्चिल्लब्धम् । एता उपमातृका आश्रित्य त्रीणि नाटकानि संशोधितानि । अन्यानि तु संशोध्यन्ते । अस्य नवादर्शस्य साहाय्यात् **स्वप्नवासवदत्त**स्याविकलं शरीरं निष्पन्नमासीत् । तेनाहमेतन्नाटकविषयस्य मत्परिश्रमस्य चारितार्थ्यं समर्थयन् नवादर्शदानोपकारिणि **श्रीमदनन्ताचार्य**महाशयेऽतीव कृतज्ञतां वहामि । अथ **स्वप्नवासवदत्त**स्योपक्रान्ते मुद्रणे अन्याप्युपमातृका **चेङ्कुन्नूरताळमण्मठकृष्णतन्त्रि**सकाशादधिगता, तथा **प्रतिज्ञायौगन्धरायणस्याभिषेकनाटकस्य प्रतिमानाटकस्य** पूर्वोक्ताज्ञातनामकनाटकांशस्य च ।

भासकालविचारः ।

११५९—तमक्रैस्ताब्दस्थितेन वन्द्यघटीय**सर्वानन्देनामरकोशटीकासर्वस्वे** "शृङ्गारवीरकरुणे"ति श्लोकव्याख्याप्रसङ्गात् "स्वदिशमात्मसात्कर्तुम् **उदयनस्य पद्मावती**परिणयोऽर्थशृङ्गारः **स्वप्नवासवदत्ते**, तृतीयस्तस्यैव **वासवदत्ता**परिणयः कामशृङ्गार" इति वदतास्मदीयमिदं **स्वप्नवासवदत्तं** स्मृतमित्यसन्दिग्धं, तस्यैवार्थशृङ्गारस्यात्र *वर्णनात् । श्रीमदाचार्या**भिनवगुप्तपादैः** क्रैस्ताब्ददशमशतकस्थितैः प्रणीतायां **भरतनाट्यवेदविवृतौ स्वप्नवासवदत्तायाः** स्मरणमस्ति "क्वचित् क्रीडा यथा **स्वप्नवासवदत्तायाम्** (अध्या० १. श्लो० ७४) इति । **दरिद्रचारुदत्त**मित्यपि किञ्चिन्नाटकनाम तत्र स्मर्यते । तन्मन्ये, एतदेव **चारुदत्तनाटकं** स्यात् ।

ध्वन्यालोककर्तुरानन्दवर्धनात् क्रैस्ताब्दनवमशतकस्थितात् प्राचीनस्य **वामनस्य काव्यालङ्कारसूत्रवृत्तौ** चतुर्थाधिकरणस्य तृतीयाध्याये **स्वप्ननाटक**चतुर्थाङ्कस्थं पद्यमुदाहृतं—

"शरच्छशाङ्कगौरेण वाताविद्धेन भामिनि ! ।
काशपुष्पलवेनेदं साश्रुपातं मुखं मम ॥"

इति । तस्यैव पञ्चमाधिकरणद्वितीयाध्याये **प्रतिज्ञायौगन्धरायण**चतुर्थाङ्कगतस्य

* कथावस्तुसंक्षेपो दृश्यताम् ।

पद्यस्य चतुर्थः पाद उदाहृतः "यो भर्तृपिण्डस्य कृते न युध्येत्" (श्लो० ४) इति । तथा तत्पञ्चमाधिकरणस्य प्रथमाध्याये **चारुदत्तनाटकप्रथमाङ्कगतः** श्लोक उदाहृतः—

"यासां बलिर्भवति मद्गृहदेहलीनां हंसैश्च सारसगणैश्च विलुप्तपूर्वः ।
तास्वेव पूर्वबलिरूढयवाङ्कुरासु बीजाञ्जलिः पतति कीटमुखावलीढः ॥"

इति ।

"लिम्पतीव तमोऽङ्गानि वर्षतावाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता ॥"

इत्यस्य **बालचरित**प्रथमाङ्के **चारुदत्त**प्रथमाङ्के च स्थितस्य श्लोकस्य पूर्वार्धं क्रैस्ताब्दषष्ठशतकभाजा **दण्डिना काव्यादर्श**स्य द्वितीयपरिच्छेद उदाहृतं—

"लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
इतीदमपि भूयिष्ठमुत्प्रेक्षालक्षणान्वितम्" ॥ २२६ ॥

ति ।

अस्ति **ध्वन्यालोकलोचने** (पृ० १५२. उ० ३)

"संक्षितपक्ष्मकपाटं नयनद्वारं स्वरूपतडनेन(?) ।
उद्घाट्य सा प्रविष्टा हृदयगृहं मे नृपतनूजा ॥"

इति

गता क्काचिदार्या **स्वप्नवासवदत्त**गततयोदाहृता । सा मन्ये **स्वप्नवासवदत्त**-

किञ्च, भवति, अस्मदीयेषु त्रिष्वपि **स्वप्नवासवदत्तादर्शे**ष्वनुपलम्भात् ।

प्रतीयते ञ्चित् प्रत्यग्रदृष्टां स्त्रियं प्रति प्रतिनवाभिलाषोदयः श्लोके तस्मिन्

परिणीतच स **वासवदत्ता**विषयो वा स्यात् **पद्मावती**विषयो वा । नाद्यः,

यदृच्छागत **वासवदत्ता**प्रवासविप्रलम्भस्यैव तत्र प्रकृतत्वात् । नापि द्वितीयः,

स्य प्रार्थनामन्तरेण **दर्शकेन** स्वयंदत्तां **पद्मावतीं** प्रतिगृहीतवतो

१ 'भर

पुष्पः' इति चारुदत्ते ।

पुस्तकालय
गुरुकुल कांगड़ी

वासवदत्ताशोकसततदह्यमानहृदयस्य **वत्सराजस्य पद्मावती**विषयाभिलाषवर्णनं प्रति तत्र काप्यनवकाशात् । तेन **स्वप्नवासवदत्ते** तस्य श्लोकस्य निवेशयोग्यं स्थानमलभमानस्य चिरनिष्प्रचारत्वमूलः पाठभ्रंशोऽपि नानुमातुं शक्यः । एवं **साहित्यदर्पणस्य** षष्ठपरिच्छेदे ८५–तमकारिकाविवरणे

"उत्साहातिशयं वत्स! तव बाल्यं च पश्यतः ।
मम हर्षविषादाभ्यामाक्रान्तं युगपन्मनः ॥"

इति यः श्लोको **बालचरित**गतत्वेनोदाहृतः, स कामं **रामबालचरित**गतो भवेत् । अत एव **दर्पण**व्याख्याता "दाशरथिं प्रति भार्गवस्योक्तिरियम्" इति तं व्याचष्टे । अस्मदीयं तु **बालचरितं** कृष्णविषयमिति तस्य श्लोकस्यात्रादर्शनं युक्तमेव ।

भामहकृतकाव्यालङ्कारस्य चतुर्थपरिच्छेदे कुतश्चित् काव्यान्न्यायविरोध उदाहृत्य निरूपितः । यथा—

"विजिगीषुमुपन्यस्य वत्सेशं वृद्धदर्शनम् ।
तस्यैव कृतिनः पश्चादभ्यधाच्चारशून्यताम् ॥ ४० ॥
अन्तर्योधशताकीर्णं सालङ्कायननेतृकम् ।
तथाविधं गजच्छद्म नाज्ञासीत् स स्वभूगतम् ॥ ४१ ॥
यदि वोपेक्षितं तस्य सचिवैः स्वार्थसिद्धये ।
अहो नु मन्दिमा तेषां भक्तिर्वा नास्ति भर्तरि ॥ ४२ ॥
शरा दृढधनुर्मुक्ता मन्युमद्भिररातिभिः ।
मर्माणि परिहृत्यास्य पतिष्यन्तीति कानुमा ॥ ४३ ॥
हतोऽनेन मम भ्राता मम पुत्रः पिता मम ।
मातुलो भागिनेयश्च रुषा संरब्धचेतसः ॥ ४४ ॥
अस्यन्तो विविधान्याजावायुधान्यपराधिनम् ।
एकाकिनमरण्यान्यां न हन्युर्बहवः कथम् ॥ ४५ ॥
नमोऽस्तु तेभ्यो विद्वद्भ्यो येऽभिप्रायं कवेरिमम् ।
शास्त्रलोकावपास्यैव नयन्ति नयवेदिनः ॥ ४६ ॥

सचेतसो वनेभस्य चर्मणा निर्मितस्य च।
विशेषं वेद बालोऽपि कष्टं किन्नु कथन्नु तत् ॥ ४७॥"

इति। अस्या **भामह**समालोचनायाः सर्वो विषयः **प्रतिज्ञा**नाटिकायां वर्तते। अपिच **प्रतिज्ञा**नाटिकायाः प्रथमाङ्के यानि "अणेण मम भादा हदो, अणेण मम पिदा, अणेण मम सुदो" इति प्राकृतवाक्यानि, तानि "हतोऽनेन मम भ्राता मम पुत्रः पिता मम" इति श्लोकरूपेणानूदितानि **भामहे**नास्मिन् न्यायविरोधसमालोचनप्रकरणे। अतो **भामहेन प्रतिज्ञा**नाटिकैवानुसंहितेत्यूहितुं शक्यते। नाटिकाया नामधेयं तु तत्कालातिप्रसिद्धिवशादकथितमपि सुज्ञानमिति धिया **भामहे**न न निर्दिष्टं स्यात्। अस्य **भामह**समालोचनाविषयभूतस्य कथावस्तुनो **बृहत्कथा**यामपि सत्त्वाद् **भामहे**न सैवानुसंहिता, न तु **प्रतिज्ञा**नाटिकेति तु न शङ्कनीयं, "हतोऽनेन मम भ्राते"ति **भामहे**नानूद्यमानस्य वाक्यस्य **प्रतिज्ञा**यां प्रत्यक्षतयोपलब्धेः, **बृहत्कथा**यां तस्य सद्भावकल्पनायां प्रमाणाभावात्। वस्तुतस्तु **भामह**कालात् परत एव **बृहत्कथाया** निष्पत्तिरित्यनुपदं वक्ष्यामः। स चायं **भामहः कालिदासात्** प्राचीनः प्रतिभाति। तेन हि **मेधावी, रामशर्मा, अश्मकवंशं, रत्नाहरणम्, अच्युतोत्तरम्** इत्यस्मदविदितानि कविकाव्यनामानि गृहीतानि। सर्वलोकविदितस्य तु श्री-**कालिदास**स्य तत्काव्यस्य वा लोकोत्तरस्य कस्यचिन्न नामधेयं गृहीतम्। **भामहाचार्य**श्चेत् **कालिदास**काव्यमद्रक्ष्यत्, तदवश्यं निरदेक्ष्यद् अतिप्रसिद्धत्वादनिर्दिशन्नपि विषयविचारादिद्वारेण **प्रतिज्ञा**नाटिकामिव वास्मरिष्यत्। यद्यपि

"अयुक्तिमद् यथा दूता जलभृन्मारुतादयः।
तथा भ्रमरहारीतचक्रवाकशुकादयः ॥ ४२ ॥
अवाचोऽव्यक्तवाचश्च दूरदेशविचारिणः।
कथं दूत्यं प्रपद्येरन्निति युक्त्या न युज्यते ॥ ४३ ॥
यदि चोत्कण्ठया तत्तदुन्मत्त इव भाषते।
तथा भवतु भूम्नेदं सुमेधोभिः प्रयुज्यते ॥ ४४ ॥"

(भाम० काव्याल० परि० १)

इति युक्तायुक्तत्वविचारे मेघमारुतादिदूतीकरणं विषयतया **भामहेन** प्रसञ्जितं, तथापि तावता **मेघदूत**काव्यं स जानातीति न युक्तं कल्पयितुम् । तथासति ह्यस्तनेन केनापि कविना प्रणीतं **शुकसन्देश**मपि स जानातीति कल्पनीयमापद्येत । अतो, मन्ये, केषुचित् काव्येषु विप्रलम्भादिप्रसङ्गे मारुतचन्द्रमेघाद्यचेतनद्वारेण भ्रमरचक्रवाकशुकाद्यव्यक्तवाक्प्राणिद्वारेण च प्रियजनाय विरहिणां सन्देशप्रेषणं क्वचित् क्वचिद् यद् वर्ण्यते, तदनुन्मादावस्थायां नेष्यत इत्येतदेव सामान्यत आचार्यः श्लोकैरेभिरुपदिष्टवान्, तच्चेदमाचार्योपदेशतात्पर्यं हृदि निधायैवौचित्यवेदी **कालिदासो मेघदूत**स्यारम्भे तद्दूतीकरणानौचित्यमाशङ्क्य परिजहार —

> "धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
> सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
> इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
> कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥" (पूर्वमेघ० ५)

इति श्लोकेन । एवं तावत् सिद्धं **भामहस्य कालिदासात्** प्राचीनत्वम् । ननु च **कालिदासेन मेघदूते** "प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्" (पूर्वमेघ० ३०) इति **कालिदास**कालवर्तिनाम् **अवन्ति**जनपदग्रामवृद्धानाम् **उदयन**कथोदाहरणनिपुणतोक्त्या **उदयन**संज्ञ**वत्सराज**द्रष्टृत्वप्रतीतेः **उदयनः कालिदास**सन्निकृष्टपूर्वकालो भवितुं युक्तः । तत् कथं **भामहो वत्सराज**स्यात्मकालसन्निकर्षं लेशतोऽप्यसूचयन् प्रत्युत तमितिहासमात्राधीतप्रायं स्फोरयन् **कालिदासात्** प्राचीनः स्यात् । नैतत् । **मालविकाग्निमित्र**प्रस्तावनायां हि "प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां कथं बहुमान" इति **भासस्य** प्रथितयशस्त्वमाह **कालिदासः**, पुराणत्वं च भासकाव्यस्य प्रत्येति । "पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् ॥" इति । तदुभयस्वरसाद् **भासस्य** कीर्तेश्चिरकालक्रमसिद्धा परा काष्ठा **कालिदास**काले स्थितेति गम्यते। सा चावरतस्तत्कृतीनां सप्ताष्टवर्षशतकप्रचारमन्तरेण न सम्भाव्येति कृत्वा **कालिदासा**पेक्षम् अतिप्राचीनत्वं **भासस्य** न्याय्यं, सुतरां तु **भासनाटकनायकस्योदयन**स्येति

न कथञ्चिदप्युदयनस्य **कालिदास**सन्निकृष्टपूर्वकालत्वशङ्काया अवकाशः। "उदयनकथाकोविदग्रामवृद्धान्" इत्येतच्च, **अवन्ति**ग्रामवृद्धाः स्वानुपलब्धमेवेतिहासाद्यधीतं स्वजनपदनिर्वृत्तम् **उदयन**कथाद्भुतं पुरावृत्तप्रेम्णा वृद्धभावसहभुवा शंसन्त आद्रियन्त इत्येवमभिप्रायं, न तु तेषा**मुदयन**दृष्टत्वानुमापकम्। अतः सुस्थं **भामहस्य कालिदास**प्राचीनत्वम्। अपिच, **भामहः काव्यालङ्कारे** कथाख्यायिकयोः स्वरूपं निरूपयन् **बृहत्कथां** नानुसन्धत्ते। सा हि कथाविशेषत्वात् तत्प्रसङ्गे स्मर्तुमुचिता। तथा च **दण्डी काव्यादर्शे** कथाख्यायिकाप्रस्तावे "भूतभाषामयीं प्राहुरद्भुतार्थां बृहत्कथाम्" इति **बृहत्कथां** स्मरति। तेन मन्ये, **भामह**काले **बृहत्कथा** नावर्ततेति। तदुत्तरकाल एव तास्ताश्चमत्कारिणीरुच्चावचाः कथा इतिहासतः **स्वप्नवासवदत्ता**दिकाव्यतो लोकतश्चोच्चित्य स्वयं कल्पयित्वा च **बृहत्कथां** नाम कथाभाण्डागारं नूनं **गुणाढ्यो** जग्रन्थ। **गुणाढ्यश्च** शकप्रवर्तक**शालिवाहन**समकाल इति **शालिवाहन**तोऽपि **भामहः** प्राचीनो भवन् क्रैस्ताब्दारम्भप्राक्तनं प्रथमं वर्षशतकं संस्पृशति। **भामहा**दपि तु जरत्तरतामर्हन्नस्मन्नाटकचक्रकविः क्रैस्तप्राक्तने तृतीये द्वितीये वा वर्षशतके निवेशमवश्यं लभते।

किञ्च, राज्यतन्त्रविद्याचार्यः **कौटिल्य** इति **चाणक्य** इति च पर्यायवाच्यो **विष्णुगुप्तश्चन्द्रगुप्त**समानकालः क्रैस्तप्राचीने चतुर्थे वर्षशतके स्थित इति सुप्रसिद्धम्। तत्प्रणीते **कौटिलीयार्थशास्त्रे** मन्त्रिपुरोहितकरणीयस्य[1] योधयुद्धप्रोत्साहनस्य प्रकारोपदेशावसरे "तुल्यवेतनोऽस्मि, भवद्भिः सहभोग्यमिदं राज्यं, मयाभिहितः परोऽभिहन्तव्यः" इति, वेदेष्वप्यनुश्रूयते—समाप्तदक्षिणानां यज्ञानामवभृथेषु 'सा ते गतिर्या शूराणामि'ति, अपीह श्लोकौ भवतः—

"यान् यज्ञसङ्घैस्तपसा च विप्राः स्वर्गैषिणः पात्रचयैश्च यान्ति।
क्षणेन तानप्यतियान्ति शूराः प्राणान् सुयुद्धेषु परित्यजन्तः॥"
"नवं शरावं सलिलस्य पूर्णं सुसंस्कृतं दर्भकृतोत्तरीयम्।
तत् तस्य मा भून्नरकं च गच्छेद् यो भर्तृपिण्डस्य कृते न युध्येत्॥"

इति मन्त्रिपुरोहिताभ्यामुत्साहयेद् योधान्[2]" (कौटि० अर्थ० अधि० १०.

१. 'लैः सुप्', २. 'स' इति प्रतिज्ञानाटिकायाम्।

अध्या० ३) इति दृश्यते। शूरस्य सद्गतिर्युद्धे प्राणांस्त्यक्तवतः यज्ञतपस्साध्यकामलाभः विजयिनः *समर्हणा च लोके सुलभा इति, राज्ञः पिण्डदातुरर्थे युद्धमकुर्वन् पापीयान् भवतीति चोदाहृतवाक्यानामभिप्रायः। तत्र "नवं शरावम्" इत्येष श्लोकः **प्रतिज्ञायौगन्धरायणस्य** चतुर्थाङ्के भटान् प्रति कस्यचित् प्रोत्साहनवाक्यतया निवेशितः। अस्य श्लोकस्य किम**र्थशास्त्रा**न्नाटके समुद्धरणम् उताहो नाटका**दर्थशास्त्रे** इति चिन्तनीयम्। तत्र युद्धप्राणत्यागस्य धर्महेतुत्वं भर्तृपिण्डानिर्यातनस्य पापहेतुत्वं चार्थप्रधानेन यदुपदिश्यते, तत् प्रमाणानुग्रहविकलमुपप्रलोभनप्रायमविश्वास्यं भवतीति तत्रावश्यं प्रमाणमुपदर्शनीयम्। तच्चादौ "सा ते गतिरि"त्यादि श्रौतमुपदर्शितम्। पश्चात्तु अभियुक्तवचनरूपं स्मृतिकल्पं श्लोकद्वयमिति स्वरसतः प्रतीतेः "नवं शरावम्" इति श्लोको **नार्थशास्त्रकारस्य** स्वोक्तिर्भवितुमर्हति। परोक्त्यानुवादसहपाठादप्ययं श्लोकोऽर्थशास्त्रकारस्य न स्वोक्तिः। "यान् यज्ञसङ्घैरि"ति पूर्वश्लोको हि 'यान्' 'तान्' इत्युभयत्राप्यनिर्दिष्टं विशेष्यं किमपि कामलक्षणं लोकलक्षणं वा पूर्वप्रकृतमाकाङ्क्षन्संशयं ग्रन्थान्तराभिजन इत्यनुवादरूपो निश्चितः। **किञ्चार्थशास्त्रे कौटिल्यः** स्वोक्तिरूपं श्लोकं श्लोकौ श्लोकान् वा न क्वचिदपि प्रतिज्ञापूर्वं लिखितवान्। इहैकत्र परम् "अपीह श्लोकौ भवत" इति तस्य पूर्वप्रतिज्ञाकरणमालक्ष्यमाणमुत्तरयोः श्लोकयोः परकीयतामेव द्योतयदर्थवद् भवति। काव्ये पुनः शास्त्रलोकसिद्धमर्थं वश्यवाचो महाकवय उत्सर्गतः स्वोक्त्यैव प्रतिपादयन्ति, यत्रक्वचिद् परवचनानुपूर्वीमनुवदन्तो वा तेऽनुवादचिह्नमवश्यं कुर्वन्तीति **प्रतिज्ञायौगन्धरायणे** अनुवादलिङ्गाकरणाद् "नवं शरावम्" इति श्लोको **भास**महाकवेरेव स्वोक्तिरिति युक्तं पश्यामः। ते**नार्थशास्त्र**कारा**च्चाणक्या**दप्ययमस्मन्महाकवेः प्राचीनत्वं सिद्धं भवति। यस्तु **मेधातिथिः प्रतिमा**नाटकस्य पञ्चमाङ्के रामं प्रति रावणवाक्ये "भोः काश्यपगोत्रोऽस्मि, साङ्गोपाङ्गं वेदमधीये, मानवीयं धर्मशास्त्रं, माहेश्वरं योगशास्त्रं, बार्हस्पत्यमर्थशास्त्रं, मेधातिथेर्न्यायशास्त्रं, प्राचेतसं श्राद्धकल्पं च" इति स्मर्यते, स दिव्यानुभावपुरुषप्रायपाठात् तथाभूतः कश्चिन्महर्षिः

---

* पूर्णजलकलशोपहारलाभरूपा पूजा।

स्याद्, न पुनर्माननीयव्याख्याता पण्डितविशेष इति भासं प्रति नैतदर्वाचीनत्वभ्रान्तेरवकाशः॥

उपलभ्यते चैतावत्प्राचीनत्वानुगुणा नाटकेष्वेतेषु गुणसमृद्धिः। अत्र हि प्रसन्नोदारगम्भीरा सरसहृदयङ्गमा भाषायाः शैल्येव तावदन्यादृशी काव्यगुणसमृद्धिः। प्रायः, यस्या वर्षसहस्राद्र्वाचीनेषु काव्येष्वतिविरलं दर्शनमभाव एव वा।

सुशिक्षितमतिगोचरैः प्रशस्तैर्जनमनोविमर्शैर्नानारूपैः सन्ति सर्वतः समृद्धा इह वाक्यसमुदाहाराः।

अवस्थाभेदभिन्नाः सुसूक्ष्मास्तत्तद्वस्तुपरमार्था यथा सचेतसां पुर इव परिस्फुरेयुस्तथेह प्रतिपादिताः।

अपिच, यदौचित्यं नाम प्रतिपाद्यसङ्कोचविकासयोर्वा रसानुरूपशब्दार्थपरिग्रहे वा, तत् क्वचिदप्यत्र रसैकदृष्टिना महाकविना न लङ्घितम्।

कामं वयं सरसभणितीनामनायासप्रसरं प्रसिद्धासु एकद्वमहाकविकृतिषु न खलु नालक्षयामः। किन्तु तस्य परमा काष्ठैतस्मिन् नाटकचक्रे संलक्ष्यते। इदं हि आत्मीयकवेर्मुखान्निःश्वसितनिर्विशेषं विनिस्सृतमिति न खलु नोदेति सचेतसामेतत् परिशीलयतां बुद्धिः। सर्वथैतद्गतं शब्दार्थसौष्ठवमार्षसूक्तिसौष्ठवस्यैव, मन्ये, चारुतरं भूमिकान्तरमिति।

एषु रूपकेष्वेकैकस्मिन्ननुवाच्यमाने गुणानेतान् इतोऽधिकांश्च सहृदयाः स्वयमसंशयं प्रत्यक्षयिष्यन्ति। एषां पृथगुदाहृतिर्बहुवाक्यानुसन्धानसापेक्षा वाग्विस्तरोपपाद्या चोपोद्घातमतिमात्रं विस्तारयेदिति नेदानीं तत्र संरभामहे। सामान्यतस्तु शैलीप्रदर्शनार्थं कानिचिद् वाक्यानि तत्तन्नाटकेभ्य उदाहरामः।

स्वप्नवासवदत्ते वने **पद्मावती**परिजनकृतोत्सारणादुःखितां **वासवदत्तां** प्रति **यौगन्धरायण**स्याश्वासनोक्तिरियं---

"पूर्वं त्वयाप्यभिमतं गतमे*वमासी-
च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः।

* एवं गतं परिजनविभवोपेतं गमनमित्यर्थः।

कालक्रमेण जगतः परिवर्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ॥"(अ० १. श्लो० ४)

सत्कारः सत्कारेण स्वीकर्तव्य इत्यमुमर्थं प्रति **वत्सराजस्य** समर्थनावाक्यं —

"गुणानां वा विशालानां सत्काराणां च नित्यशः ।
कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः ॥" (अ० ४. श्लो० ९)

प्रतिज्ञानाटिकायां प्रयत्नस्य फलावश्यम्भावोक्तिः —

"काष्ठादग्निर्जायते मथ्यमानाद्
भूमिस्तोयं खन्यमाना ददाति ।
सोत्साहानां नास्त्यसाध्यं नराणां
मार्गारब्धाः सर्वयत्नाः फलन्ति ॥" (अ० १. श्लो० १८)

वरेषु गवेषणीयगुणपरा **महासेनस्योक्तिः** —

"कुलं तावच्छ्लाघ्यं प्रथममभिकाङ्क्षे हि मनसा
ततः सानुक्रोशं मृदुरपि गुणो ह्येष बलवान् ।
ततो रूपे कान्तिं न खलु गुणतः स्त्रीजनभयात्
ततो वीर्योदग्रं न हि न परिपाल्या युवतयः ॥" (अ० २. श्लो० ४)

कन्यामातॄणामवस्थोक्तिः —

"अदत्तेत्यागता लज्जा दत्तेति व्यथितं मनः ।
धर्मस्नेहान्तरे न्यस्ता दुःखिताः खलु मातरः ॥" (अ० २. श्लो० ७)

पञ्चरात्रे द्रोणाचार्यस्य शिष्यविषयचिन्तोक्तिः —

"अतीत्य बन्धूनवलङ्घ्य मित्रा-
ण्याचार्यमागच्छति शिष्यदोषः ।
बालं ह्यपत्यं गुरवे प्रदातु-
र्नैवापराधोऽस्ति पितुर्न मातुः ॥" (अ० १. श्लो० १८)

युधिष्ठिरस्य धार्तराष्ट्रदोषादात्मदोषाभिशङ्कनपरेयमुक्तिः—

"एकोदकत्वं खलु नाम लोके
मनस्विनां कम्पयते मनांसि ।
वैरप्रियैस्तैर्हि कृतेऽपराधे
यत्सत्यमस्माभिरिवापराद्धम् ॥" (अ० २. श्लो० ९)

योधकर्माभिनन्दनं प्रति **विराटस्योक्तिः**—

"ताडितस्य हि योधस्य श्लाघनीयेन कर्मणा ।
अकालान्तरिता पूजा नाशयत्येव वेदनाम् ॥ (अ० २. श्लो० २८)

चारुदत्तनाटके अन्धकारविषयोक्तिः—

"सुलभशरणमाश्रयो भयानां
वनगहनं तिमिरं च तुल्यमेव ।
उभयमपि हि रक्ष्यतेऽन्धकारे
जनयति यश्च भयानि यश्च भीतः ॥" (अ० १. श्लो० २०)

चौर्यप्रवृत्तस्योक्तिः—

"लुब्धोऽर्थवान् साधुजनाभिमानी
वणिक् स्ववृत्तावतिकर्कशश्च ।
यस्तस्य गेहं यदिनाम लप्स्ये
भवामि दुःखोपहतो न चित्ते ॥" (अ० ३. श्लो० ७)

दूतघटोत्कचे धृतराष्ट्रस्याभिमन्युवधदुःखितस्योक्तिः—

"बहूनां समुपेतानामेकस्मिन् निर्घृणात्मनाम् ।
बाले पुत्रे प्रहरतां कथं न पतिता भुजाः ॥"(श्लो० १७)

दुर्योधनं प्रति **घटोत्कचस्योक्तिः**—

"न तु जतुगृहे सुप्तान् भ्रातॄन् दहन्ति निशाचराः
शिरसि न तथा भ्रातुः पत्नीं स्पृशन्ति निशाचराः ।
न च सुतवधं सङ्ख्ये वृत्तं स्मरन्ति निशाचरा
विकृतवपुषोऽप्युग्राचारा घृणा न हु वर्जिता ॥"(श्लो० ४५)

अविमारके राजभावस्य मन्त्रित्वस्य च दुर्वहतां प्रति राज्ञो मन्त्रिणश्चोक्ती—

"धर्मः प्रागेव चिन्त्यः सचिवमतिगतिः प्रेक्षितव्या स्वबुद्ध्या
प्रच्छाद्यौ रागरोषौ मृदुपरुषगुणौ कालयोगेन कार्यौ ।
ज्ञेयं लोकानुवृत्तं परचरनयनैर्मण्डलं प्रेक्षितव्यं
रक्ष्यो यत्नादिहात्मा रणशिरसि पुनः सोऽपि नावेक्षितव्यः ॥
(अ० १. श्लो० १२)

"प्रसिद्धौ कार्याणां प्रवदति जनः पार्थिवबलं
विपत्तौ विस्पष्टं सचिवमतिदोषं जनयति ।
अमात्या इत्युक्ताः श्रुतिसुखमुदारं नृपतिभिः
सुसूक्ष्मं दण्ड्यन्ते मतिबलविदग्धाः कुपुरुषाः ॥"(अ० १. श्लो० ९)

अयं निशारम्भवर्णने श्लोकः—

"व्यामृष्टसूर्यतिलको विततोडुमालो
नष्टातपो मृदुमनोहरशीतवातः ।
संलीनकामुकजनः प्रविकीर्णचोरो
वेषान्तरं रचयतीव मनुष्यलोकः ॥" (अ० २. श्लो० १३)

दैवस्य बलवत्तां प्रति श्लोकः—

"यत्ने कृते यदि न सिध्यति कोऽत्र दोषः
को वा न सिध्यति ममेति करोति कार्यम् ।
यत्नैः शुभैः पुरुषता भवतीह नृणां
दैवं विधानमनुगच्छति कार्यसिद्धिः ॥". (अ० ३. श्लो० १२(

बालचरिते तमसः प्रभुत्वं प्रति यथा —

"अप्रकाशा इव दिशो घनीभूता इव द्रुमाः।
सुनिविष्टस्य लोकस्य कृतो रूपविपर्ययः॥" (अ० १. श्लो० १६)

यथा च —

*"दुद्दिणविणट्ठजोह्णा ळत्ती वट्टइ णिमीलिआकाळा।
संपाउदप्पसुत्ता णीळणिवषणा जहा गोवी॥" (अ० १. श्लो० १९)

मध्यमव्यायोगे मङ्गलश्लोको यथा —

"पायात् स वोऽसुरवधूहृदयावसादः
पादो हरेः कुवलयामलखड्गनीलः।
यः प्रोद्यतस्त्रिभुवनैकमणे रराज
वैदूर्यसङ्क्रम इवाम्बरसागरस्य॥" (श्लो० १)

राक्षसवर्णनं यथा —

"सिंहास्यः सिंहदंष्ट्रो मधुनिभनयनः स्निग्धगम्भीरकण्ठो
बभ्रुभ्रूः श्येननासो द्विरदपतिहनुर्दीर्घविश्लिष्टकेशः।
व्यूढोरा वज्रमध्यो गजवृषभगतिर्लम्बपीनांसबाहुः
सुव्यक्तं राक्षसीजो विपुलबलयुतो लोकवीरस्य पुत्रः॥"(श्लो० २६)

कर्णभारे कवचकुण्डलदानं वारयितारं **शल्यं** प्रति **कर्णोक्तिः** —

"शिक्षा क्षयं गच्छति कालपर्ययात्
सुबद्धमूला निपतन्ति पादपाः।

* दुर्दिनविनष्टज्योत्स्ना रात्रिर्वर्तते निमीलिताकारा।
सम्प्रावृतप्रसुप्ता नीलनिवसना यथा गोपी॥

जलं जलस्थानगतं च शुष्यति
हुतं च दत्तं च तथैव तिष्ठति ॥" (श्लो० १९)

ऊरुभङ्गे भग्नोरुपतितस्य **दुर्योधनस्य** वर्णनं यथा —

"श्रीमान् संयुगचन्दनेन रुधिरेणार्द्रानुलिप्तच्छवि-
भूसंसर्पणरेणुपाटलभुजो बालव्रतं आहितः ।
निर्वृत्तेऽमृतमन्थने क्षितिधरान्मुक्तः सुरैः सासुरै-
राकर्षन्निव भोगमर्णवजले श्रान्तोज्झितो वासुकिः ॥" (श्लो०२८)

अभिषेकनाटके सीताग्निप्रवेशचोदनादुःखितस्य लक्ष्मणस्योक्तिः —

"विज्ञाय देव्याः शौचं च श्रुत्वा चार्यस्य शासनम् ।
धर्मस्नेहान्तरे न्यस्ता बुद्धिर्दोलायते मम ॥" (अ० ६. श्लो० २१)

रावणस्य रामभयनिवारणोक्तिः —

"कथं लम्बसटः सिंहो मृगेण विनिपात्यते ।
गजो वा सुमहान् मत्तः सृगालेन निहन्यते ॥" (अ०३. श्लो०१९)

प्रतिमानाटके रामस्य वचनम् —

"आरब्धे पटहे स्थिते गुरुजने भद्रासने लङ्घिते
स्कन्धोच्चारणनम्यमानवदनप्रच्योतितोये घटे ।
राज्ञाहूय विसर्जिते मयि जनो धैर्येण मे विस्मितः
स्वः पुत्रः कुरुते पितुर्यदि वचः कस्तत्र भो विस्मयः ॥"
(अ० १. श्लो० ४)

रामस्य स्वाभिषेकाज्ञाश्रवणोत्तरमात्मपितृपादपतनवृत्तान्तोक्तिः **सीतां** प्रति —

"समं बाष्पेण पतता तस्योपरि ममाप्यधः ।
पितुर्मे क्लेदितौ पादौ ममापि क्लेदितं शिरः ॥" (अ० १. श्लो० ९)

कैकेयीकुपितस्य लक्ष्मणस्य रामं प्रत्युक्तिः —

"यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दया
स्वजननिभृतः सर्वोऽप्येवं मृदुः परिभूयते ।
अथ न रुचितं मुञ्च त्वं मामहं कृतनिश्चयो
युवतिरहितं लोकं कर्तुं यतश्छलिता वयम् ॥" (अ० १. श्लो० १८)

भरतस्य स्वजनदर्शनौत्सुक्यादुक्तिः —

"पतितमिव शिरः पितुः पादयोः स्निह्यतेवास्मि राज्ञा समुत्थापित-
स्त्वरितमुपगता इव भ्रातरः क्लेदयन्तीव मामश्रुभिर्मातरः ।
सदृश इति महानिति व्यायतश्चेति भृत्यैरिवाहं स्तुतः सेवया
परिहसितमिवात्मनस्तत्र पश्यामि वेषं च भाषां च सौमित्रिणा ॥"
(अ० ३. श्लो० ३)

भरतस्य कैकेयीं प्रत्युक्तिः —

"वयमयशसा चीरेणार्यो नृपो गृहमृत्युना
प्रततरुदितैः कृत्स्नायोध्या मृगैः सह लक्ष्मणः ।
दयिततनयाः शोकेनाम्बाः स्नुषाध्वपरिश्रमै-
र्धिगिति वचसा चोग्रेणात्मा त्वया ननु योजिताः ॥"
(अ० ३. श्लो० १६)

तस्यैवोक्त्यन्तरं —

"तत्र यास्यामि यत्रासौ वर्तते लक्ष्मणप्रियः ।
नायोध्या तं विनायोध्या सायोध्या यत्र राघवः ॥"
(अ० ३. श्लो० २२)

अविदितनामके नाटके मङ्गलश्लोकः—

"पादः पायादुपेन्द्रस्य सर्वलोकोत्सवः स वः ।
व्याविद्धो नमुचिर्येन तनुताम्रनखेन खे ॥"

एषा श्लोकानां शैली । अच्छन्दोबद्धानां तु वाक्यानां सर्वेषामपि कामनीयकं श्लोकतोऽप्युत्कृष्टमेषु रूपकेषु सर्वत्र सजातीयसर्वग्रन्थान्तरातिशायि निरुपमं च । तदेतद् ग्रन्थानुवाचनयैव सुखसंवेद्यं भावकानामिति नेह तद्वाक्योदाहरणप्रपञ्चनं कुर्मः ।

न खलु सा काचिद् रीतिः **कालिदासा**दिनाटकेष्वभिलक्ष्यते, यां **भास**महाकविः स्वेषु नाटकेषु न प्रस्थापयाम्बभूव । विक्रमाब्दारम्भोत्तरमन्यगामिनीं कविचक्रवर्तिख्यातिं लब्धवतः **कालिदासस्य** कृतिष्वभ्यर्हिते **अभिज्ञानशाकुन्तले भास**काव्यच्छायानामनुकरणं भूयिष्ठमुपलभ्यते । यथा —

भासानुकरणम् ।

"यस्यां न प्रियमण्डनापि महिषी देवस्य मन्दोदरी
स्नेहालुम्पति पल्लवान् न च पुनर्वीजन्ति यस्यां भयात् ।
वीजन्तो मलयानिला अपि करैरस्पृष्टबालद्रुमा
सेयं शक्ररिपोरशोकवनिका भग्नेति विज्ञाप्यताम् ॥"

इत्ययम**भिषेक**नाटकचतुर्थाङ्कगतः श्लोकः । अस्यच्छाया **शाकुन्तल**चतुर्थाङ्कस्थे

"पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥"

इत्यस्मिन् पद्ये लक्ष्यते । न केवलमिह तच्छायामात्रस्य दर्शनं, किन्तु "प्रियमण्डनापि, स्नेहात्, पल्लवान्, सेयम्" इत्येषां सरसहृद्यानां तदीयपदानामप्युपादानमस्ति । **बालचरितस्य** प्रथमाङ्के शिशुमर्धरात्रे **वसुदेवस्य** हस्ते कथञ्चिदर्पयित्वा हृदयेन शिशुदिशं देहेन सूतिकागृहं च द्विदिक्कं गच्छन्तीं **देवकी**मधिकृत्य **वसुदेवस्य** वचनं —

"हृदयेनेह तत्राङ्गैर्द्विधाभूतेव गच्छति ।
यथा नभसि तोये च चन्द्रलेखा द्विधाकृता ॥"

इति। अस्यच्छाया **शाकुन्तल**प्रथमाङ्कस्थे

> "गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः।
> चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥"

इति पद्ये स्पष्टा। **स्वप्नवासवदत्त**प्रथमाङ्कगतस्य 'विस्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्ययाः' इति पादस्य कयाचिद् भङ्ग्यार्थानुकारः 'विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगाः' इति **शाकुन्तल**प्रथमाङ्के कृतः। एवमन्यदपि **भास**नाटकच्छायानुविधानं **कालिदास**कृतिषु द्रष्टव्यम्। **भवभूते**रप्येतन्नाटकचक्रपरिशीलनजनिताः संस्कारास्तत्कृतिषु बहुलं प्रस्फुरन्ति। **उत्तररामचरित**स्य द्वितीयाङ्कगतो ह्यात्रेयीसंवादः **स्वप्नवासवदत्त**प्रथमाङ्कगतं ब्रह्मचारिसंवादमनुकरोति, षष्ठाङ्कगतश्च विद्याधरसंवादोऽ**भिषेक**नाटकषष्ठाङ्कगतं विद्याधरसंवादम्। **मालतीमाधव**पञ्चमाङ्कस्थो दण्डकप्रयोगोऽ**विमारक**पञ्चमाङ्कस्थं दण्डकप्रयोगमनुकरोति।

मृच्छकटिकविचारः।

अपिच, यत् **कालिदासात्** प्राचीनं मन्यन्ते, तस्मिन् **मृच्छकटिके** न **भास**काव्यच्छायामात्रस्यानुकरणम्, अपितु **भास**काव्यवाक्यानामेव भूयिष्ठानां साक्षान्निवेशनमस्ति। **चारुदत्त**नाटके हि यानि पद्यानि चूर्णकवाक्यानि च, तानि तथैव वा मनागावापोद्वापाभ्यां व्यत्ययकरणेन वा **मृच्छकटिके** परिपठितानि। तत्र **चारुदत्त**नाटकस्य प्रथमाङ्के श्लोकः—

> "यासां बलिर्भवति मद्गृहदेहलीनां
> हंसैश्च सारसगणैश्च विभक्तपुष्पः।
> तास्वेव पूर्वबलिरूढयवाङ्कुरासु
> बीजाञ्जलिः पतति कीटमुखावलीढः ॥"

इति। **मृच्छकटिक**स्य तु—

> "यासां बलिः सपदि मद्गृहदेहलीनां
> हंसैश्च सारसगणैश्च विलुप्तपूर्वः।

तास्वेव सम्प्रति विरूढतृणाङ्कुरासु
बीजाञ्जलिः पतति कीटमुखावलीढः ॥"

इति । **चारुदत्तस्य** तृतीयाङ्के —

"मार्जारः प्लवने वृकोऽपसरणे श्येनो गृहालोकने
निद्रा सुप्तमनुष्यवीर्यतुलने संसर्पणे पन्नगः ।
माया वर्णशरीरभेदकरणे वाग् देशभाषान्तरे
दीपो रात्रिषु सङ्कटे च तिमिरं वायुः स्थले नौर्जले ॥"

इति । **मृच्छकटिकस्य** तु—

"मार्जारः क्रमणे मृगः प्रसरणे श्येनो गृहालुञ्चने
सुप्तासुप्तमनुष्यवीर्यतुलने श्वा सर्पणे पन्नगः ।
माया रूपशरीरवेषरचने वाग् देशभाषान्तरे
दीपो रात्रिषु सङ्कटेषु डुडुभो वाजी स्थले नौर्जले ॥"

इति । **चारुदत्तस्य** चतुर्थाङ्के —

"विषादस्रस्तसर्वाङ्गी सम्भ्रमोत्फुल्ललोचना ।
मृगीव शरविद्धाङ्गी कम्पसे चानुकम्पसे ॥"

इति । **मृच्छकटिकस्य** तु—

"विषादस्रस्तसर्वाङ्गी संभ्रमभ्रान्तलोचना ।
नीयमाना भुजिष्यात्वं कम्पसे नानुकम्पसे ॥"

इति । **चारुदत्तनाटके** "किण्णुखु अज्ज पच्चूस एव्व गेहादो णिक्खन्तस्स बुभुक्खाए पुक्खरपत्तपडिदजळविन्दू विअ चळचळाअन्ति विअ मे अक्खीणि । (परिक्रम्य) जाव गेहं गच्छिअ जाणामि किण्णुखु संविधा विहिदा ण वेत्ति । एदं अह्माणं गेहं । जाव पविसामि" इति सूत्रधारवाक्यानि । एतद्-

र्थकानि मृच्छकटिके त्वेतानि "..............चिरसञ्चिदोवासणेण सुक्ख-पोक्खरणाळाइं विअ मे बुभुक्खाए मिळाणाइं अङ्गाइं । ता जाव गेहं गदुअ आणामि अत्थि किं पि कुटुम्बिणीए उववादिअं ण वेत्ति । (परिक्रम्यावलोक्य च) एदं तं अह्माणं गेहं, ता पविसामि ।"

चारुदत्तनाटकस्य द्वितीयाङ्कादौ वाक्यानि—

"**गणिका**—तदो तदो ।

चेटी—अह्महे ण किञ्चि मए भणिदं । किं तदो तदो त्ति ।

गणिका—हञ्जे ! किं मए मन्तिदं"

एतदर्थकानि मृच्छकटिकस्य तत्र वाक्यानि—

वसन्तसेना—हञ्जे ! तदो तदो ।

चेटी—अज्जुए ! ण किं पि मन्तेसि । किं तदो तदो ।

वसन्तसेना—किं मए भणिदं ।

चेटी—तदो तदो त्ति ।"

चारुदत्तनाटकस्य तृतीयाङ्के वाक्यानि—

"**चारुदत्तः**—वयस्य ! वीणा नामासमुद्रोत्थितं रत्नम् । कुतः"

"**विदूषकः**—कामं पसंसेदु भवं । मम खु दाव गाअन्तो मणुस्सो इत्थिआ वि पठन्ती उभअं आदरं ण देदि । गाअन्तो दाव मणुस्सो रत्तसुमणा-वेट्ठिदो विअ पुरोहिदो दिढं ण सोभइ । इत्थिआ वि पठन्ती छिण्णणासा विअ धेणुआ अदिविरूवा होइ ।"

मृच्छकटिके त्वेतानि—

"**चारुदत्तः**—अहो अहो साधु साधु रेभिलेन गीतम् । वीणा हि नामासमुद्रोत्थितं रत्नम् । कुतः"

"**विदूषकः**—मम दाव दुवेहिं जेव्व हस्सं जाअदि इत्थिआए सक्कअं पठन्तीए मणुस्सेण अ काअळिं गाअन्तेण । इत्थिआ दाव सक्कअं पठन्ती दिण्णणवणस्सा विअ गिट्टी अहिअं सुसुआअदि । मणुस्सो वि काअळिं गा-अन्तो सुक्खसुमणोदामवेट्ठिदो वुड्ढपुरोहिदो विअ मन्तं जवन्तो दिढं मे ण रोअदि ।"

चारुदत्तनाटकस्य चतुर्थाङ्के वाक्यं—

"**सज्जलकः**—मदनिके! किं न पर्याप्तं, द्वितीयमप्यनार्यं करिष्यामि। न खल्वत्र शस्त्रेण कश्चित् परिक्षतो व्यापादितो वा ।"

एतदर्थकं **मृच्छकटिकस्य** वाक्यं—

"**शर्विलकः**—मदनिके! भीते सुप्ते न शर्विलकः प्रहरति । तन्मया न कश्चिद् व्यापादितो नापि परिक्षतः ।"

चारुदत्तचतुर्थाङ्के वाक्यान्तरं—

"**सज्जलकः**—आर्यचारुदत्तेनास्मि प्रेषितः, यस्तावदलङ्कारो मम हस्ते निक्षिप्तः, स त्वयं भोगमलिनतया गृहस्यासान्निध्यात् कौटुम्बिकानां दुरारक्षः । तद् गृह्यतामिति ।"

एतदर्थकं **मृच्छकटिके** वाक्यं—

"**शर्विलकः**—"सार्थवाहस्त्वां विज्ञापयति—जर्जरत्वाद् गृहस्य दूरक्षमिदं भाण्डम् । तद् गृह्यतामिति ।"

एवमन्यान्यपि भूयिष्ठानि वाक्यानि श्लोकाश्च **मृच्छकटिके चारुदत्ती-**यसंवादीनि दृश्यन्ते । इतिवृत्तं च द्वयोश्चारुदत्तचरितमेव । तेनैवं मन्तव्यं—तयोरन्यतरदन्यतरस्याधार इति । तत्रापि **चारुदत्तनाटकमेव मृच्छकटिक-**स्य मूलमिति न्याय्यं, **मृच्छकटिके**ऽर्वाचीनकाव्यादृतस्य प्रस्तावनायां कवि-काव्यनामनिर्देशस्य दर्शनेन तस्य तन्निर्देशरहित**चारुदत्ता**पेक्षयार्वाचीनत्वौ-चित्यात् । किञ्च, **चारुदत्तनाटका**दृष्टा अपि मनोहराः केऽपि ग्रन्थसन्दर्भा

मृच्छकटिके सन्ति । तेन लघुग्रन्थरूपतया स्थितं **चारुदत्त**नाटकम् आस्वाद्यतातिशयाय कैश्चित् संस्कारैरुपेतं कृत्वा विस्तार्य च **मृच्छकटिक**संज्ञयं **शूद्रकेण** ख्यापितमिति युक्तमूहितुम् । एवञ्च **मृच्छकटिकस्य चारुदत्त**नाटकप्रभवत्वात् तत्र सचेतसां **चारुदत्त**वदतिपुरातनत्वावभास उपपद्यते, तत्सङ्कलनमात्रकर्तरि च **शूद्रके** तन्मूलककवित्वभ्रमादतिप्राचीनत्वभ्रमः । काममयं **कालिदास**तः प्राचीन इत्यत्र प्रमाणाभावः, आलङ्कारिक**वामनात्** तु प्राचीन एवासौ । तदीयायां **काव्यालङ्कारसूत्र**वृत्तौ "शूद्रकादिरचितेषु प्रबन्धेष्वस्य (श्लेषाख्यगुणस्य) भूयान् प्रपञ्चो दृश्यते" इति कथनात् । तदेवं **भासस्य** कवित्ववैभवं **कालिदासशूद्रका**द्युपजीव्यमासीदिति फलितम् ॥

अत्र नाटकचक्रे ततइतः सन्ति केचित् परिमिताः पाणिनीयाहृद्या आलङ्कारिकाहृद्याश्च प्रयोगाः—

प्रयोगविशेषाः ।

१. "अपरिचयात्तु न **श्लिष्यते** मे मनसि ।" (स्वप्न. अङ्क. १)

२. "**आपृच्छामि** भवन्तौ ।" (स्वप्न. अङ्क. १)

३. "साधुजनहस्तंगतैषा **नोत्कण्ठिष्यति** ।" (स्वप्न. अङ्क. १)

४. "हस्त्यश्वरथपदातीनि विजयाङ्गानि ।" (प्रतिज्ञा. अङ्क. ४)

५. "दैवप्रामाण्याद् **भ्रश्यते** वर्धते वा ।" (प्रतिज्ञा. अङ्क. १)

६. "यावदहमुच्छ्वसामि ।" (प्रतिज्ञा. अङ्क. १)

७. "कथमगणितपूर्वं **द्रक्ष्यते**........**श्रोष्यते** ।" (प्रतिज्ञा. अङ्क. १)

८. "प्रथमम**भिकाङ्क्षे** हि मनसा ।" (प्रतिज्ञा. अङ्क. २)

९. "जित इति पुनरेनं **रुष्यते** वासुभद्रः ।" (पञ्च. अङ्क. २)

१०. "स्त्रीगतां **पृच्छसे** कथाम् ।" (पञ्च. अङ्क. २)

११. "वीजन्तो मलयानिला अपि ।" (अभिषेक. अङ्क. ३)

१२. "सीतां समाश्वासितुम् ।" (अभिषेक. अङ्क. ७)

१३. ऋज्वायतां च मुखतोरणलोलमालाम् ।" (स्वप्न. अङ्क. ५)

इत्येवञ्जातीयकाः । अत्र स्थूलाक्षरेषु पदेषु पदव्यत्ययः, 'हस्त्यश्वरथपदातीनी'-त्यत्रानेकवद्भावः उच्छ्वसामीत्यत्र शबलोपः, 'वीजन्तः' 'समाश्वासितुमि'त्यनयोर्णिजूलोपः, 'ऋज्वायतां चे'त्यत्र पादपूरणार्थश्चशब्दश्च कृतः । किन्त्वत्र समाधानमपि पाणिनीयानां सुगमम् । द्वितीये प्रयोगे आ इत्यस्यानुपसर्गतायाः, तृतीये आत्मनेपदानित्यतायाः, चतुर्थे हस्त्यश्वरथसहिताः पदातयो येषु तानीति बहुव्रीहेः, षष्ठे गणकार्यानित्यतायाः, एकादशे पचाद्यजन्ताद् वीजशब्दादाचारक्विपः, द्वादशे समाश्वासवच्छब्दाण्णिचो बाहुलकलोपस्य, त्रयोदशे चशब्दस्य तुशब्दार्थकतायाः, अन्येषु यथाकथञ्चित् कर्मवद्भावस्य चाश्रयणेनोपपत्तेः । वस्तुतस्तु **नन्द**कालिक**चाणक्य**प्राचीनस्यास्मिन्महाकवे**र्नन्द**सहजीवि**वर्षोपाध्याय**शिष्य**पाणिनि**शासनानुसरणमसम्भाविर्नामिति एवंविधः प्रयोगस्तत्रभवतो वश्यवाङ्मयस्य महाकवेर्न दूषणम्, अपितु पुराणतरताया भूषणमिति विभावनीयम् । अव्युत्पन्नलेखकहस्तपरम्पराप्रमादापतिता वा प्रचाररहितेऽस्मिन् नाटकचक्रेऽपपाठा एषु कतिपये स्युः ।

एवं **प्रतिज्ञा**नाटिकायां **भामहो**द्भावितः पूर्वोक्तो न्यायविरोधोऽपि सुपरिहरः । चारशून्यतया सचिवोपेक्षया वा **वत्सराजस्य** महामतेः सतो गजच्छद्मप्रयोगविषयशत्रूद्यमाज्ञानं, क्रुद्धैर्बहुभिः शत्रुभिरसहायस्य करगतस्य तस्य हननाभावः, प्रत्यक्षदृष्टेऽपि कृत्रिमगजे दिवा विशेषाग्रहणम् इत्येतानर्थान् **भामहो** न्यायविरुद्धान् मन्यते । तत्र हि आद्ययोर्न काचिदनुपपत्तिः, चारवतो भक्तिमन्त्रिपुणसचिवचिन्त्यमानकार्यस्य वृद्धदर्शनस्य च सतोऽपि गजमृगयाव्यसनितयामात्यानुमतिमप्रतीक्ष्य रभसधाविनो राज्ञः शत्रूद्यमाज्ञानस्य सम्भवाद्, वीरः सावज्ञो मानवान् वैरी जीवग्राहं गृहीत्वा स्वस्वामिपादमूले यन्नीयते, तदेव तद्वधापेक्षया स्वामिपरितोषकरमिति, करगतस्य बहुप्रहारानिश्चेष्टस्य हननमतिक्षुद्रकर्मेति च विचारणया निपुणोदारभृत्यसाधारणया परा-

मात्येन सालङ्कायनेन कृतस्य स्वयोधोपक्रान्तवत्सराजवधप्रतिषेधस्य न्याय्यत्वाच्च । अत एवारुचेर्मन्ये, भामहाचार्यस्तृतीयं न्यायविरोधं कृत्रिमगजगतविशेषाज्ञानलक्षणं पर्यन्ते समुद्भावयाम्बभूव । किन्तु सूक्ष्मेक्षिकायामेतदपि दूषणं न लगति । प्रतिज्ञानाटिकायां हि वत्सराजच्छलनवृत्तान्तं निवेदयन् हंसको नाम वक्ति —

"तदो दिउणं विअ अद्धाणं गच्छिअ साळलुक्खच्छाआए सवण्णणट्ठणीळदाए परुब्भासिदेहिं असरीरविणिक्खित्तेहिं विअ दन्तजुअळेहिं सूइदो धणुसदमत्तेण विअ दिट्ठो सो दिव्ववारणपडिच्छन्दो"

इति । यत्र स कृत्रिमो नीलहस्ती स्थापितस्तत्र वनोद्देशे सालवृक्षच्छायायास्तथा बाहुल्यमासीद्, यथा तद्देहनैल्यस्याविवेकोऽभवदित्यनेन वाक्येन प्रतीयते । तत् कथं दन्तयुगलानुमेयप्राये तस्मिन् कपटहस्तिनि दिवापि कृत्रिमत्वज्ञापकविशेषग्रहणस्य सम्भवः । कामम् 'अनर्धागते सूर्ये' मध्याह्नासन्नकाले वा वत्सराजस्यायं नीलहस्तिग्रहणसम्भ्रम इति प्रतिज्ञानाटिकातोऽवगमात् सान्द्रयापि वनच्छायया वासरमध्यालोकप्रभावस्यानभिभवनीयत्वाद् दिवा सालवृक्षच्छायया न गजगतविशेषतिरोधानं भवति, तया गजस्वरूपगतनैल्यावच्छादनोक्तिश्चेयमतिशयोक्तिमात्रमिति मत्वा भामहेन दूषणं दत्तम्, अस्माभिस्तु सालच्छायाबाहुल्येन दिनप्रभावाभिभवं सम्भावयद्भिरेनामनुभवसिद्धवस्तुवृत्तकथनरूपां मत्वा तद् दूषणं समाहितम् । यथा तूक्तं बृहत्कथाप्रतिबिम्बे कथासरित्सागरे* सान्ध्यतिमिरप्रसरोऽपि तदानीं स्थित इति, तथा कृत्रिमगजगतविशेषाज्ञानं वत्सराजस्य सुतरामेवोपपन्नम् । किन्त्वियं सान्ध्यतिमिरप्रसरवाचोयुक्तिः प्रतिज्ञानाटिकायां नास्ति । बृहत्कथायां तु एषा सोमदेवभट्टेन दृष्टा स्याद्, यां तन्मूले कथासरित्सागरे स निवेशितवान् । बृहत्कथायां चैषा ‡ तत्कर्त्रास्य भामहदूषणस्य परिहारदार्ढ्याय कल्पिता स्याद् इति सर्वमनवद्यम् ॥

---

* द्वितीयलम्बकस्य चतुर्थतरङ्गेऽष्टादशश्लोकः—

"गान्धर्वदत्तचित्तत्वात् सन्ध्याध्वान्तवशाच्च सः ।
न तं वनगतं राजा मायागजमलक्षयत् ॥" इति ।

‡ एतां चेद् भामहो व्यज्ञास्यत्, कृत्रिमगजगतविशेषाज्ञानस्य न्यायविरुद्धत्वं नावक्ष्यद् इत्यतोऽपि हेतोर्बृहत्कथा भामहादर्वाचीना वेदितव्या ।

अस्य भासनाटकचक्रस्य कालिदासकाले निरङ्कुशः प्रचार आसीत्, 'प्रथितयशसां भाससौमिल्लकविपुत्रादीनाम्' इति कालिदासोक्तेः।

अप्रचारः। शूद्रककाले तु स भृशं विरलोऽभवत्। अत एव मृच्छकटिके शूद्रकस्य चारुदत्तनाटकीयभूयिष्ठवाक्यसङ्कलनसंरम्भोपपत्तिः, तथा परवाक्यसङ्कलननिष्पादितस्य मृच्छकटिकस्य प्रचारोपपत्तिश्च। ततः प्रचारः क्रमशो हीयमानो गत एव तावदभावमद्यत्वे। तत्र किं कारणं स्यात्। न तावद् गुणविरहः कारणं, कालिदासादिस्पृहणीयगुणगणपौष्कल्यस्य प्रागुपपादनात्। नापि स्वरसभङ्गसमर्थनीयपूर्वोक्तकतिपयप्रयोगसंयुक्तत्वं कारणं, वार्त्तिक-महाभाष्यादिसाचिव्यदूराधिरूढमहिमनि सर्वतो व्याप्तिं गते पाणिनीये शब्दानुशासने, कासुचित् ततइतः प्रसृत्वरीषु मेधाविभामहाद्यालङ्कारिकप्रणीतासु शिक्षासु, तदुभयानुसरणनियमप्रणये च संस्कृताध्यायिनां सर्वतः संजाते प्रादुर्भूतानां कालिदासकृतीनां तथाविधकतिपयप्रयोगसंयुक्तत्वेऽपि प्रचाराव्याघातात्। नापि ग्रन्थेषु कविनामानिवेशः कारणं, ग्रन्थानिविष्टकविनाम्नामपि रघुवंश–शिशुपालवधादीनां प्रचारदर्शनात्। अतोऽप्रचारे कारणमदृष्टमेव किञ्चित् कल्प्यं, यद्बलाद् आचार्यव्याडिप्रणीतः सङ्ग्रहो गुणाढ्यरचिता बृहत्कथेत्येवमादयो ग्रन्था नामशेषतां प्राप्ताः।

एवं चिरप्रनष्टानामतिपुराणानामेषां भासनाटकानां बहूनामयमिदानीं युगपदुपलम्भो मृतपुनरुत्थानवत् कस्य नाम जगति न भवेदाश्चर्याय चानन्दाय च। एष हि संस्कृतप्रणयिनां पुरावृत्तविमर्शकानां च महार्घो निधिलाभः। अनेन च प्रनष्टलाभप्रत्ययेन कापि जनिता मे प्रत्याशा—नाटकान्तराण्यपि तस्य जातुचिदुपलप्स्यीयेति, नखलु भासनाटकानि परिगणितानि केनचिद् एतावन्तीति। अपूर्वभासनाटकबृन्दाभिलेखधन्यं जीर्णतालपत्रसम्पुटं ये चिरादरक्षन्, मह्यं चोपाकुर्वन्, तेषु मणलिक्करमठस्वामिषु विशिष्य तज्ज्येष्ठे शङ्करनारायणशर्ममहाशये कृतज्ञतामनपायिनीं वहामि। स्मरामि च हार्देन कतिपयतदुपमातृकादायकस्य पिषारोटिगोविन्दज्यौतिषिकस्य (पुत्तियल्) वासुदेवशर्ममहाशयस्य (तालमण्) कृष्णतन्त्रिमहाशयस्य च।

तदेवमभिनवोपलब्धानां नाटकानां स्वभावः, कर्ता, काल इत्येतत्प्रधाना विचाराः कृताः । पुरावृत्तविशेषाभ्यूहानुकूलं वस्तु तेषु किंकिमस्तीति चिन्तनं सकलनाटकव्यालोडनसापेक्षत्वात् सकलनाटकप्रकाशनोत्तरमेव सुकरं सुबोधं चेति कृत्वा स्थापितमायत्यै । उपलब्धे नाटकचक्रसंपुटे **स्वप्नवासवदत्त**नाटकस्य प्राथम्यान्नाटकान्तरकर्त्रादिनिर्णयानुकूलत्वाच्च तदिदानीमादितः प्रकाशयामः । क्रमेण तु **प्रतिज्ञायौगन्धरायणा**दीनि प्रकाशयिष्यामः ॥

निगमनम् ।

अनन्तशयनम्
११–४–१९१२.

त. गणपतिशास्त्री.

Ready for sale.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0

Trivandrum Sanskrit Series.

	RS.	AS.	P.
No. 1 — दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2 — अभिनवकौस्तुभमाला - दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni.	0	2	0
No. 3 — नलाभ्युदयः (Kâvya) by Vâmana Bhaṭṭa Bâṇa.	0	4	0
No. 4 — शिवलीलार्णवः (Kâvya) by Nîlakaṇṭha Dîkshita.	2	0	0
No. 5 — व्यक्तिविवेकः (Alankâra) by Mahima Bhaṭṭa with commentary.	2	12	0
No. 6 — दुर्घटवृत्तिः (Vyâkaraṇa) by Saraṇadeva.	2	0	0
No. 7 — ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî.		4	0
No. 8 — प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa.	1	0	0
No. 9 — विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10 — मातङ्गलीला (Gajalakshaṇa) by Nîlakaṇṭha.	0	8	0
No. 11 — तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	4	0
No. 12 — परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13 — सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	0	0
No. 14 — नीतिसारः (Nîti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15 — स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition)	1	8	0

No. 16—प्रतिज्ञायौगन्धरायणम् (Do.) Do.	1	8	0
No. 17—पञ्चरात्रम् (Do.) Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyaṇa Bhaṭṭa with the commentary of Desamangala Vârya.	4	0	0
No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyaṇa Bhaṭṭa and Nârâyaṇa Paṇḍita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् (Do.) Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (1 & 2 Kâṇḍas)	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (1 & 2 Sargas)	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (3rd Kânda)	2	4	0
No. 30—वास्तुविद्या (Silpa)	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (4th, 5th, & 6th Kâṇdas)	1	0	0
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Aruṇagirinâtha and Vivaraṇa of Nârâyaṇa Paṇdita (3rd, 4th & 5th Sargas)	2	8	0
No. 33—वाररुचसंग्रहः (Vyâkaraṇa) with the commentary Dîpaprabhâ of Nârâyana	0	8	0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin	1	4	0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha	1	8	0

No. 36	कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivaraṇa of Nârâyaṇa Pandita (6th, 7th & 8th sargas)	3	0	0
No. 37	आशौचाष्टकम् (Smriti) by Vararuchi with the commentary	0	4	0
No. 38	नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Sarvânanda (Ist Kânda)	2	0	0
No. 39	चारुदत्तम् (Nâtaka) by Bhâsa	0	12	0
No. 40	अलङ्कारसूत्रम् (Alankâra) by Râjânaka Srî Ruyyaka with the Alankârasarvaswa of Srî Mankhuka and its commentary by Samudrabandha	2	8	0
No. 41	अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivaraṇa of Srî Saṇkara Bhagavat Pada	0	4	0
No. 42	प्रतिमानाटकम् (Nataka) by Bhâsa	1	8	0

Apply to :—

The Agent for the sale of

Government Sanskrit Publications,

Trivandrum.

निवेदना ।

(प्रथमसंस्करणस्य)

अत्रास्य **स्वप्नवासवदत्तम्** इति संज्ञा **राजशेखर**सुभाषितानुसाराद् व्यवहृता । **स्वप्नवासवदत्तेति स्वप्ननाटक**मिति च कामं व्यवहर्तुं शक्यम् । तत्र **मणलिक्कर**मठीया **स्वप्नवासवदत्त**मातृका **क.** चिह्निता । पण्डि**तानन्ताचार्य**प्रहिता **ख.** चिह्निता । **कृष्णतन्त्रि**स्वामिका **ग.** संज्ञा । आद्ययोः पाठभेदाः प्रतिपृष्ठमधस्तान्निवेशिताः, तृतीयस्यास्तु ते पुस्तकान्ते पृथङ् निवेशिताः । मातृकायामदृष्टानामपेक्षिततया प्रतिभातानामक्षराणां चापरेखान्तर्निवेशनम्, असमञ्जसानामक्षराणां पार्श्वतः प्रश्नचिह्नदानपूर्वं समञ्जसाभिमतान्यक्षराणि निवेश्य तेषामुभयेषां चापरेखान्तर्निवेशनं, समञ्जसाक्षराप्रतिभानऽसमञ्जसाक्षरमात्रस्य सप्रश्नचिह्नस्य चापरेखान्तर्न्यसनमित्येषा संशोधनरीतिः । कस्याञ्चिदपि मातृकायां प्राकृतस्य संस्कृतच्छायाया अदर्शनात् सा प्रायः पर्यालोच्य लिखिता । तत्तत्पृष्ठेषु यथापेक्षं टिप्पण्यप्यधस्ताद् दत्ता । ये **ग.** ग्रन्थे पाठभेदाः, ये च **क.** ग्रन्थे त्रुटितांशाः **ख.** ग्रन्थादुपलब्धाः, ते पुस्तकस्यान्ते परिशिष्टतया योजिताः ॥

त. गणपतिशास्त्री.

निवेदना ।

इदं **स्वप्नवासवदत्तस्य** द्वितीयं संस्करणम् । **किळिमानूर्** राजगृहादचिरोपलब्धेन समग्रेण केनापि **स्वप्नवासवदत्ता**दर्शग्रन्थेन पुस्तकमिदं संवादितम् । तस्य घ. संज्ञस्य हृद्याः कतिपये पाठाः पुस्तकशरीरे निवेशिताः, अन्ये तु तत्र तत्र पृष्ठेऽधस्ताद् योजिताः । एष आदर्शग्रन्थः केरळीयलिपिस्त्रिशतवर्षवृद्धदेश्यस्तालपत्रात्मकः शुद्धप्रायः ।

उपोद्घातादिकं सर्वं प्राथमिकसंस्कारगतमेवात्र पुस्तके न्यस्तम् । **कर्णभारस्य** स्थापनावाक्यम् 'अज्ञातनामकम्' इत्युक्तस्य (**दूतवाक्यस्य**) रूपकस्य नामधेयं समाप्तिवाक्यं चेत्येतानि तत्रोपोद्घातेऽनुदाहृतानि **अनन्तशयनसंस्कृतग्रन्थावल्या** द्वाविंशाङ्कादवगन्तव्यानि । ते हि रूपके समग्रे तस्मिन्नङ्के मेलिते ।

अनन्तशयनम्
२९. २. १९१९.

त. गणपतिशास्त्री.

कथावस्तुसंक्षेपः ।

"**पद्मावतीं** नाम **दर्शक**स्य राज्ञो भगिनीं वत्सराज **उदयनः** परिणेष्यति, ततः शत्रुहृतं राज्यं समग्रं पुनरधिगमिष्यति" इति सिद्धादेशिकवाक्यविश्वासात् **पद्मावती**परिणयशीघ्रघटनाय **वत्सराज**मन्त्री **यौगन्धरायणो वासवदत्तां** नाम तत्पूर्वमहिषीमवन्तिराज**महासेन**दुहितरं **लावाणक**ग्रामदाहेन दग्धामपदिश्य ब्राह्मणव्यञ्जनः प्रोषितभर्तृकस्वभगिनीव्यपदेशेन **पद्मावत्या** हस्ते न्यासं कृत्वा गतः । तां चात्यन्तिक**वासवदत्ता**विरहप्रतीत्या **वत्सराजः** सशोकोऽपि **दर्शके**न दत्तां महिषीत्वेन प्रतिजग्राह । एकदा पर्यङ्कनिद्रालोर्**वत्सराज**स्य पार्श्वे **पद्मावती**बुद्ध्या संविष्टा **वासवदत्ता** स्वात्मानमभिसम्बुध्योत्स्वप्नायमानमुत्कण्ठया **वत्सराजं** स्वप्नवचनानुगुणं किमप्यभिभाष्य संस्पृश्य च तत्प्रबोधभिया शय्यागृहाद् बहिरधावद्, झटिति च प्रबुध्यानुधावतो **वत्सराजाद्** द्वारपक्षाभिघातक्षणप्रतिरुद्धगतेर्निलिल्ये । अथ द्विगुणरणरणकदूनो **वत्सराजो वासवदत्ता**वैवाहिकचित्रफलके **वासवदत्ता**जनन्या स्वात्मविनोदाय जामातृवात्सल्याद् यदृच्छया प्रहिते तां **पद्मावत्या** सह पश्यन् "अस्ति चित्रदृष्ट**वासवदत्ता**रूपसंवादिनी काचि**दावन्तिका** नाम मदन्तःपुरे, सा हि ब्राह्मणेन केनचित् स्वभगिनीति रक्षणार्थं मयि न्यस्ता" इति तया बोधितोऽभवत् । ततस्तया तामानीताम् **उदयनः** प्रत्यभिज्ञाय **यौगन्धरायणे**न च कपटब्राह्मणेन न्यासप्रत्यर्पणार्थिना तत्कालसन्निहितेन समागम्य विदितसफलात्ममन्त्रितन्त्रमुदितस्ताभ्यां पत्नीभ्यां सहितः सौख्यानि निर्विवेशेति ॥

पात्राणि

पुरुषाः —

राजा	=	उदयननामा वत्सराजः ।
यौगन्धरायणः	=	वत्सराजमन्त्री ।
विदूषकः	=	वसन्तकनामा वत्सराजनर्मसचिवः ।
ब्रह्मचारी	=	लावाणकेऽधीती ।
काञ्चुकीयः	=	राजकुले भृत्यः ।
संभषकः भटः	=	पद्मावतीभृत्यौ ।

स्त्रियः —

वासवदत्ता	=	उदयनस्य प्रथममहिषी । इयमावन्तिका च ।
पद्मावती	=	मगधराजस्य दर्शकनाम्नो भगिनी ।
तापसी		
चेटी	=	पद्मावत्याः किङ्करी ।
मधुकरिका पद्मिनिका	=	पद्मावत्याः सख्यौ चेट्यौ वा ।
धात्री	=	पद्मावत्या उपमाता ।
विजया	=	वत्सराजगृहे प्रतिहारी ।
धात्री	=	वासवदत्ताया उपमाता ।

॥ श्रीः ॥

श्रीगणेशाय नमः ।

महाकविश्रीभासप्रणीतं

स्वप्नवासवदत्तम् ।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः —

*उदयनवेन्दुसवर्णावासवदत्ताबलौ बलस्य त्वाम् ।
पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम् ॥ १ ॥

एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग! पश्यामि ।

(नेपथ्ये)

(क) उस्सरह उस्सरह अय्या! उस्सरह ।

सूत्रधारः — भवतु, विज्ञातम् ।

(क) उत्सरतोत्सरतार्याः! उत्सरत ।

---

* उदयनवेन्दुसवर्णौ [illegible]णौ दत्तमासवं मद्यं यस्यै सा आसवदत्ता । दत्तशब्दस्य परनिपात आहिताग्न्यादि(२. २. ३७)त्वात्, तथाभूताबला याभ्यां तौ आसवदत्ताबलौ पद्मावतीर्णपूर्णौ [illegible] वसन्ते कम्रौ मनोज्ञौ तत्कालोचित-[illegible]परिग्रहात्, वसन्ताख्यता[illegible]मनोज्ञौ वा बलस्य बलभद्रस्य भुजौ त्वां पातां रक्षताम् । अत्र मुद्रालङ्कारविधया प्रधानपात्राणाम् उदयन-वासवदत्ता-पद्मावती-वसन्तकानां निर्देशः कृतः ।

भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः ।
धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः ॥ २ ॥

(निष्क्रान्तः)

स्थापना ।

(प्रविश्य)[1]

भटौ[2] — (क) उस्सरह उस्सरह अय्या ! उस्सरह ।

(ततः प्रविशति परिव्राजकवेषो यौगन्धरायणः आवन्तिकावेषधारिणी वासवदत्ता च)

यौगन्धरायणः — (कर्णं दत्त्वा) कथमिहाप्युत्सार्यते । कुतः,

धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलै-
र्मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते ।
उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः
[3]कोऽयं भो निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया[4] ॥ ३ ॥

वासवदत्ता — (ख) अय्य ! को एसो उस्सारेदि ।

यौगन्धरायणः — भवति ! यो धर्मादात्मानमुत्सारयति ।

वासवदत्ता — (ग) अय्य ! ण हि[5] एव्वं वत्तुकामा, अहं वि णाम[6] उस्सारइदव्वा होमि त्ति ।

(क) उत्सरतोत्सरतार्याः ! उत्सरत ।

(ख) आर्य ! क एष उत्सारयति ।

(ग) आर्ये ! न खल्वेवं वक्तुकामा, अहमपि नामोत्सारयितव्या भवामीति ।

---

१. 'ततः प्रविशतः साधारणौ', २. 'साधारणौ — उ', ३. 'सो', ४. 'त्युत्सुकौ ॥', ५. 'हु', ६. 'दाव उ' ख. पाठः.

यौगन्धरायणः—भवति! एवमनिर्ज्ञातानि दैवतान्यवधूयन्ते ।

वासवदत्ता—(क) अय्य! तह[1] परिस्समो परिखेदं ण उप्पादेदि, जह[2] अअं परिभवो ।

यौगन्धरायणः—भुक्तोज्झित एष विषयोऽत्र[3] भवत्या । नात्र चिन्ता कार्या । कुतः,

पूर्वं त्वयाप्यभिमतं गतमेवमासी-
च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः ।
कालक्रमेण जगतः परिवर्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ॥ ४ ॥

भटौ[4]—(ख) उस्सरह अय्या! उस्सरह[5] ।

(ततः प्रविशति काञ्चुकीयः)

काञ्चुकीयः—सम्भषक! नखलु नखलूत्सारणा कार्या । पश्य,

परिहरतु भवान्[6] नृपापवादं
न परुषमाश्रमवासिषु प्रयोज्यम्[7] ।
नगरपरिभवान्[8] विमोक्तुमेते
वनमभिगम्य मनस्विनो वसन्ति ॥ ५ ॥

(क) आर्य! तथा परिश्रमः परिखेदं नोत्पादयति, यथायं परिभवः ।
(ख) उत्सरतार्याः! उत्सरत ।

१. 'णः—ए', २. 'तहं प', ३ 'यस्तत्र', ४. 'उभौ—उ', ५. 'ह अय्या! उस्सरह । त' ख. पाठः. ६. 'वो नृ', ७. 'ज्य।' क. पाठः' ८. 'द्वि मो' ख. पाठः.

उभौ—(क) अय्य! तह ।

(निष्क्रान्तौ)

यौगन्धरायणः—हन्त सविज्ञानमस्य दर्शनम् । वत्से! उपसर्पावस्तावदेनम् ।

वासवदत्ता—(ख) अय्य! तह ।

यौगन्धरायणः—(उपसृत्य) भोः! किङ्कृतेयमुत्सारणा ।

काञ्चुकीयः—भोस्तपस्विन्!

न्धरायणः—(आत्मगतम्) तपस्विन्निति गुणवान् ल्वयमालापः । अपरिचयात्तु न श्लिष्यते‡ मे मनसि ।

काञ्चुकीयः—भोः! श्रूयताम् । एषा खलु गुरुभिरभिहितनामधेयस्यास्माकं महाराजदर्शकस्य भगिनी पद्मावती नाम । सैषा नो महाराजमातरं महादेवीमाश्रमस्थामभिगम्यानुज्ञाता तत्रभवत्या राजगृहमेव यास्यति[२] । तद् अद्यास्मिन्नाश्रमपदे वासोऽभिप्रेतोऽस्याः । तद्भवन्तः,

तीर्थोदकानि समिधः कुसुमानि दर्भान्
स्वैरं वनादुपनयन्तु तपोधनानि[३] ।
धर्मप्रिया नृपसुता न हि धर्मपीडा-
मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः ॥ ६ ॥

(क) आर्य! तथा ।

(ख) आर्य! तथा ।

१. 'नम् । (उपगम्य) भोः' ख. पाठः. २. 'ति । अ' क. पाठः. ३. 'नानाम्।' क. ख. पाठः.

‡कर्मवद्भावो बोद्धव्यः ।

*यौगन्धरायणः — (स्वगतम्) एवम् । एषा सा[1] मगधराजपुत्री[2] पद्मावती नाम, या पुष्पकभद्रादिभिरादेशिकैरादिष्टा स्वामिनो देवी भविष्यतीति । ततः,

प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते ।
भर्तृदाराभिलाषित्वादस्यां मे महती स्वता ॥ ७ ॥

वासवदत्ता — (स्वगतम्) (क) राअदारिअत्ति सुणिअ भइणिआसिणेहो वि मे एत्थ सम्पज्जइ ।

(ततः प्रविशति पद्मावती सपरिवारा चेटी[3] च)

चेटी — (ख) एदु एदु भट्टिदारिआ, इदं[4] अस्समपदं पविसदु ।

(ततः प्रविशत्युपविष्टा[5] तापसी)

तापसी — (ग) साअदं राअदारिआए ।

वासवदत्ता — (स्वगतम्) (घ) इअं सा राअदारिआ । अभिजणाणुरूवं खु से रूवं ।

पद्मावती — (ङ) अय्ये! वन्दामि ।

(क) राजदारिकेति श्रुत्वा भगिनिकास्नेहोऽपि मेऽत्र संपद्यते ।
(ख) एत्वेतु भर्तृदारिका, इदमाश्रमपदं प्रविशतु ।
(ग) स्वागतं राजदारिकायाः ।
(घ) इयं सा राजदारिका । अभिजनानुरूपं खल्वस्या रूपम् ।
(ङ) आर्ये! वन्दे ।

---

१. 'सा रा' ख. पाठः. २. 'त्री या', ३. 'टी ए' क. पाठः. ४. 'इदो इदो भ', ५. 'ति ता' ख. पाठः.

---

* इयं यौगन्धरायणोक्तिः समनन्तरवासवदत्तोक्त्युत्तरं पठ्यते ख. पुस्तके ।

तापसी—(क) चिरं जीव । पविस जादे! पविस । तवोवणाणि णाम अदिहिजणस्स सअगेहं ।

पद्मावती—(ख) भोदु भोदु । अय्ये! विस्सत्थेह्मि । इमिणा बहुमाणवअणेण अणुग्गहिदह्मि[3] ।

वासवदत्ता—(स्वगतम्) (ग) ण हि[4] रूवं एव्व, वाआ वि खु से महुरा ।

तापसी—(घ) भद्दे! इमं दाव भद्दमुहस्स भइणिअं[5] कोच्चि राआ ण वरेदि ।

चेटी—(ङ) अत्थि राआ पज्जोदो णाम उज्जइणीए । सो दारअस्स कारणादो दूदसम्पादं करेदि ।

वासवदत्ता—(आत्मगतम्) (च) भोदु भोदु । एसा अ अत्तणीआ दाणिं संवुत्ता ।

(क) चिरं जीव । प्रविश जाते! प्रविश । तपोवनानि नामातिथिजनस्य स्वगेहम् ।

(ख) भवतु भवतु । आर्ये! विश्वस्तास्मि । अनेन बहुमानवचनेनानुगृहीतास्मि ।

(ग) न हि रूपमेव, वागपि खल्वस्या मधुरा ।

(घ) भद्रे! इमां तावद् भद्रमुखस्य भगिनिकां कश्चिद् राजा न वरयति ।

(ङ) अस्ति राजा प्रद्योतो नामोज्जयिन्याः । स दारकस्य कारणाद् दूतसम्पातं करोति ।

(च) भवतु भवतु । एषा चात्मीयेदानीं संवृत्ता ।

१. 'सी प' क. पाठः. २. 'सिह्मे' । क. ख पाठः. ३. 'ह्मि अ' । क. पाठः. ४. 'हु' ख. पाठः. ५. 'आ' क. पाठः.

तापसी — (क) अहो खु इअं आइदी इमस्स बहुमाण-स्स । उभआणि[1] राअउळाणि महत्तराणि त्ति सुणीअदि[2] ।

पद्मावती — (ख) अय्य ! किं दिट्ठो मुणिजणो अत्ताण अणुग्गहीदुं[3] । अभिप्पेदप्पदाणेण तवस्सिजणो उवणिमन्तीअ-दु दाव को किं एत्थ इच्छदि त्ति ।

काञ्चुकीयः — यदभिप्रेतं भवत्या[4] । भो भो आश्रमवा-सिनस्तपस्विनः ! शृण्वन्तु शृण्वन्तु भवन्तः । इहात्रभवती मगधराजपुत्री अनेन विस्रम्भेणोत्पादितविस्रम्भा धर्मार्थमर्थे-नोपनिमन्त्रयते[5] ।

कस्यार्थः कलशेन को मृगयते वासो यथानिश्चितं
दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत् ।
आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया
यद्यस्यास्ति[6] $समीप्सितं वदतु तत् कस्याद्य किं दीयताम् ॥

यौगन्धरायणः — हन्त दृष्ट उपायः । (प्रकाशम्) भोः ! अहमर्थी ।

(क) अहो खल्वियमाकृतिरस्य बहुमानस्य । उभे राजकुले महत्तरे इति श्रूयते ।

(ख) आर्य ! किं दृष्टो मुनिजन आत्मानमनुग्रहीतुम् । अभिप्रेतप्रदानेन तपस्विजन उपनिमन्त्र्यतां तावत् कः किमत्रेच्छतीति ।

१. 'णि म', २. 'न्दि' क. पाठः. ३. 'दुं इ' क. ख. पाठः. ४. 'भवति ! तथा ।' घ. पाठः. ५. 'वतु भवत्यै' ख. पाठः. ६. 'यद्यस्य स' घ. पाठः.

$ 'स ईप्सितं' इति स्यात् ।

पद्मावती—(क) दिट्ठिआ सहळं मे तवोवणाभिगमणं ।

तापसी—(ख) संतुट्ठतपस्सिजणं इदं अस्समपदं । आअन्तुएण इमिणा होदव्वं ।

काञ्चुकीयः—भोः! किं क्रियताम् ।

यौगन्धरायणः—इयं मे स्वसा । प्रोषितभर्तृकामिमामिच्छाम्यत्रभवत्या कञ्चित् कालं परिपाल्यमानाम् । कुतः,

कार्यं नैवार्थैर्नापि भोगैर्न वस्त्रै-
र्नाहं काषायं वृत्तिहेतोः प्रपन्नः ।
धीरा कन्येयं दृष्टधर्मप्रचारा
शक्ता चारित्रं रक्षितुं मे भगिन्याः ॥ ९ ॥

वासवदत्ता—(आत्मगतम्) (ग) हं[२] इह मं णिक्खिविदुकामो अय्ययोगन्धरायणो । होदु, अविआरिअ कमं ण करिस्सदि ।

काञ्चुकीयः—भवति! महती खल्वस्य व्यपाश्रयणा§ । कथं प्रतिजानीमः । कुतः,

(क) दिष्ट्या सफलं मे तपोवनाभिगमनम् ।

(ख) सन्तुष्टतपस्विजनमिदमाश्रमपदम् । आगन्तुकेनाने[illegible] भवितव्यम् ।

(ग) हम् इह मां निक्षेप्तुकाम आर्ययौगन्धरायणः । भवतु, [illegible]विचार्य कमं न करिष्यति ।

४. फ' घ. पाठः. १. 'हा' ख. पाठः.

§ व्यपाङ्पूर्वात् श्रिञ्धातोर्बाहुलकाद् भावे युच् ।

सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः ।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम् ॥ १० ॥

पद्मावती — (क) अय्य ! पढमं उग्घोसिअ को किं इच्छदि त्ति अजुत्तं दाणिं विआरिदुं । जं एसो भणादि, तं अणुचिट्ठदु अय्यो ।

काञ्चुकीयः — अनुरूपमेतद् भवत्याभिहितम् ।

चेटी — (ख) चिरं जीवदु भट्टिदारिआ एवं सच्चवादिणी ।

तापसी — (ग) चिरं जीवदु भद्दे ! ।

काञ्चुकीयः — भवति ! तथा[1] । (उपगम्य) भोः ! अभ्युपगतमत्रभवतो भगिन्याः परिपालनमत्रभवत्या ।

यौगन्धरायणः — अनुगृहीतोऽस्मि तत्रभवत्या । वत्से ! उपसर्पात्रभवतीम् ।

वासवदत्ता[2] — (घ) (आत्मगतम्) का गई । एसा गच्छामि मन्दभाआ ।

(क) आर्य ! प्रथममुद्घोष्य कः किमिच्छतीत्ययुक्तमिदानीं विचारयितुम् । यदेष भणति, [illegible]नुतिष्ठत्वार्यः ।

(ख) चिरं जीवतु भर्तृदारिकैवं सत्यवादिनी ।

(ग) चिरं जीवतु भद्रे ! ।

(घ) का गतिः । एषा गच्छामि मन्दभागा ।

---

१. 'था अ', २. 'ता ए' ख. पाठः.

पद्मावती — (क) भोदु भोदु । अत्तणीआ दाणिं संवुत्ता ।

तापसी — (ख) जा ईदिसी से आइदी, इयं वि राअदारिअत्ति तक्केमि ।

चेटी — (ग) सुट्ठु अय्या भणादि । अहं वि अणुहूदसुहत्ति पेक्खामि ।

यौगन्धरायणः — (आत्मगतम्) हन्त भोः ! अर्धमवसितं भारस्य । यथा मन्त्रिभिः सह समर्थितम्, तथा परिणमति । ततः प्रतिष्ठिते स्वामिनि तत्रभवतीमुपनयतो मे इहात्रभवती मगधराजपुत्री विश्वासस्थानं भविष्यति । कुतः,

पद्मावती नरपतेर्महिषी भवित्री
दृष्टा विपत्तिरथ[१] यैः प्रथमं प्रदिष्टा ।
तत्प्रत्ययात् कृतमिदं न हि सिद्धवाक्या-
न्युत्क्रम्य गच्छति विधिः सुपरीक्षितानि ॥ ११ ॥

(ततः प्रविशति ब्रह्मचारी)

ब्रह्मचारी — (ऊर्ध्वमवलोक्य[२]) स्थितो मध्याह्नः । दृढमस्मि परिश्रान्तः । अथ कस्मिन् प्रदेशे विश्रमयिष्ये[३] । (परिक्रम्य) भवतु, दृष्टम् । अभितस्तपोवनेन भवितव्यम् । तथाहि —

(क) भवतु भवतु । आत्मीयेदानीं संवृत्ता ।

(ख) या ईदृश्यस्या आकृतिः, इयमपि राजदारिकेति तर्कयामि ।

(ग) सुष्ठु आर्या भणति । अहमपि अनुभूतसुखेति पश्यामि ।

---

१. 'पि' ख. पाठः. २. 'निरूप्य)' क. पाठः. ३. 'विश्रमिष्ये'(?) ख. पाठः.

विस्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्यया
वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः ।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो
निःसन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः ॥ १२ ॥

यावत् प्रविशामि । (प्रविश्य) अये आश्रमविरुद्धः खल्वेष *जनः । (अन्यतो विलोक्य) अथवा तपस्विजनोऽप्यत्र । निर्दोषमुपसर्पणम् । अये स्त्रीजनः ।

काञ्चुकीयः—स्वैरं स्वैरं प्रविशतु भवान् । सर्वजनसाधारणमाश्रमपदं नाम ।

वासवदत्ता—हं[2] ।

पद्मावती—(क) अम्मो परपुरुसदंसणं परिहरदि अय्या । भोदु, सुपरिवालणीओ खु मे[3]ण्णासो ।

काञ्चुकीयः—भोः! पूर्वं प्रविष्टाः स्मः । प्रतिगृह्यतामतिथिसत्कारः ।

ब्रह्मचारी†—(आचम्य) [illegible] भवतु । निवृत्तपरिश्रमोऽस्मि ।

यौगन्धरायणः—भोः! कुत आगम्यते, क्व गन्तव्यं, क्वाधिष्ठानमार्यस्य ।

(क) अम्मो परपुरुषदर्शनं परिहरत्यार्या । भवतु, सुपरिपालनीयः खलु मन्न्या[illegible] ।

---

१. 'यात् त्व' ख. पाठः. २. 'नुहम्'(?), ३. 'मे णा' ख. पाठः.

---

* जनः कञ्चु[illegible] † इतः परं 'भोः । श्रूयताम्' इत्येव ख. पुस्तकपाठः ।

ब्रह्मचारी—भोः ! श्रूयताम् । राजगृहतोऽस्मि । श्रुतिविशेषणार्थं वत्सभूमौ लावाणकं नाम ग्रामस्तत्रोषितवानस्मि ।

वासवदत्ता—(क) (आत्मगतम्) हा लावाणअं णाम । लावाणअसंकित्तणेण पुणो णवीकिदो विअ मे सन्दावो ।

यौगन्धरायणः—अथ परिसमाप्ता विद्या ।

ब्रह्मचारी—न खलु तावत् ।

यौगन्धरायणः—यद्यनवसिता विद्या, किमागमनप्रयोजनम् ।

ब्रह्मचारी—तत्र खल्वतिदारुणं व्यसनं संवृत्तम् ।

यौगन्धरायणः—कथमिव ।

ब्रह्मचारी—तत्रोदयनो नाम राजा प्रतिवसति ।

यौगन्धरायणः—श्रूयते तत्रभवानुदयनः । किं सः ।

ब्रह्मचारी—तस्यावन्तिराजपुत्री वासवदत्ता नाम पत्नी दृढमभिप्रेता किल ।

यौगन्धरायणः—भवितव्यम् । ततस्ततः ।

ब्रह्मचारी—ततस्तस्मिन् मृगयानिष्क्रान्ते राजनि ग्रामदाहेन सा दग्धा ।

वासवदत्ता—(ख) (आत्मगतम्) अलिअं अलिअं एदं । जीवामि मन्दभाआ ।

(क) हा लावाणकं नाम । लावाणकसङ्कीर्तनेन पुनर्नवीकृत इव मे सन्तापः ।

(ख) अलीकमलीकमेतत् । जीवामि मन्दभागा ।

---

१. 'ह', २. 'अ खु ए' घ. पाठः

यौगन्धरायणः — ततस्ततः ।

ब्रह्मचारी — ततस्तामभ्यवपत्तुकामो यौगन्धरायणो नाम[1] सचिवस्तस्मिन्नेवाग्नौ पतितः ।

यौगन्धरायणः — सत्यं पतित इति । ततस्ततः ।

ब्रह्मचारी — ततः प्रतिनिवृत्तो राजा तद्वृत्तान्तं श्रुत्वा तयोर्वियोगजनितसन्तापस्तस्मिन्नेवाग्नौ प्राणान् परित्यक्तुकामोऽमात्यैर्महता यत्नेन वारितः ।

वासवदत्ता — (क) (आत्मगतम्) जाणामि जाणामि अय्यउत्तस्स मइ साणुक्कोसत्तणं ।

यौगन्धरायणः — ततस्ततः ।

ब्रह्मचारी — ततस्तस्याः शरीरोपभुक्तानि दग्धशेषाण्याभरणानि परिष्वज्य[2] राजा मोहमुपगतः ।

सर्वे — हा[3] ।

वासवदत्ता — (स्वगतम्) (ख) सकामो दाणिं अय्यजोअन्धराअणो होदु ।

चेटी — (ग) भट्टिदारिए ! रोदिदि खु इअं अय्या ।

पद्मावती — (घ) साणुक्कोसाए होदव्वं ।

(क) जानामि जानाम्यार्यपुत्रस्य मयि सानुक्रोशत्वम् ।

(ख) सकाम इदानीमार्ययौगन्धरायणो भवतु ।

(ग) भर्तृदारिके ! रोदिति खल्वियमार्या ।

(घ) सानुक्रोशया भवितव्यम् ।

१. 'मामात्यस्त' ख. पाठः. २. 'ज्य परित्यज्य रा', ३. 'हम' ब. पाठः ।

यौगन्धरायणः—अथकिमथकिम्। प्रकृत्या सानुक्रोशा मे भगिनी। ततस्ततः।

ब्रह्मचारी—ततः शनैः शनैः प्रतिलब्धसंज्ञः संवृत्तः।

पद्मावती—(क) दिट्ठिआ धरइ, मोहं[1] गदो त्ति सुणिअ [2]सुण्णं विअ मे हिअअं।

यौगन्धरायणः—ततस्ततः।

ब्रह्मचारी—ततः स राजा महीतलपरिसर्पणपांसुपाटलशरीरः सहसोत्थाय[3] 'हा[4] वासवदत्ते! हा अवन्तिराजपुत्रि! हा प्रिये! हा प्रियशिष्ये!' इति किमपि किमपि बहु प्रलपितवान्। किं बहुना,

नैवेदानीं तादृशाश्चक्रवाका
  नैवाप्यन्ये स्त्रीविशेषैर्वियुक्ताः।
धन्या सा स्त्री यां तथा वेत्ति भर्ता
  भर्तृस्नेहात् सा[5] हि दग्धाप्यदग्धा॥ १३॥

यौगन्धरायणः—अथ भोः! तं तु पर्यवस्थापयितुं न कश्चिद् यत्नवानमात्यः।

ब्रह्मचारी—अस्ति रुमण्वान्नामामात्यो दृढं प्रयत्नवांस्तत्रभवन्तं पर्यवस्थापयितुम्। स हि,

(क) दिष्ट्या ध्रियते। मोहं गत इति श्रुत्वा शून्यमिव मे हृदयम्।

१. 'हगदो', २. 'सुठन्त (?) वि' ख. पाठः. ३. 'योत्थाय हा' घ. पाठः. ४. 'हा अवन्तिराजपुत्रि! हावासवदत्ते! हा प्रि', ५. 'सामिद्' ख. पाठः.

अनाहारे तुल्यः प्रततरुदितक्षामवदनः
शरीरे संस्कारं नृपतिसमदुःखं परिवहन् ।
दिवा वा रात्रौ वा परिचरति यत्नैर्नरपतिं
नृपः प्राणान् सद्यस्त्यजति यदि तस्याप्युपरमः ॥ १४ ॥

वासवदत्ता — (क) [(स्वगतम्)] दिट्ठिआ सुणिक्खित्तो दाणीं अय्यउत्तो ।

यौगन्धरायणः — (आत्मगतम्) अहो *महद्भारमुद्वहति रुमण्वान् । कुतः,

सविश्रमो ह्ययं [1]भारः प्रसक्तस्तस्य तु श्रमः ।
तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः ॥ १५ ॥

(प्रकाशम्) अथ भोः! पर्यवस्थापित इदानीं स राजा ।

ब्रह्मचारी — तदिदानीं न जाने । इह तया सह हसितम्, इह तया सह कथितम्, इह तया सह पर्युषितम्, इह तया सह कुपितम्, इह तया सह शयितम्, इत्येवं तं विलपन्तं राजानममात्यैर्महता यत्नेन तस्माद् ग्रामाद् गृही-

(क) दिष्ट्या सुनिक्षिप्त इदानीमार्यपुत्रः ।

१. 'स' ख. पाठः.

* महतो दुरुद्वहभारवहनक्षमस्य भारं महद्भारम् । अयं नराधिपदाररक्षणरूपो मदीयो भारः सविश्रमः पद्मावत्यां तन्न्यसनादित्यर्थः । तस्य रुमण्वतः प्रसक्तो भारस्तु नराधिपरक्षणलक्षणः श्रमः श्रमहेतुः ।

त्वापक्रान्तम्[1] । ततो निष्क्रान्ते राजनि प्रोषितनक्षत्रचन्द्रमिव नभोऽरमणीयः संवृत्तः स ग्रामः । ततोऽहमपि निर्गतोऽस्मि ।

तापसी —— (क) सो खु गुणवन्तो णाम राआ, जो आअन्तुएण[2] वि इमिणा एव्वं पसंसीअदि ।

चेटी —— (ख) भट्टिदारिए ! किंणुखु अवरा इत्थिआ तस्स हत्थं गमिस्सदि ।

पद्मावती—— (ग) (आत्मगतम्) मम हिअएण एव्व सह मन्तिदं ।

ब्रह्मचारी —— *आपृच्छामि भवन्तौ । गच्छामस्तावत्[3] ।

उभौ—— गम्यतामर्थसिद्धये ।

ब्रह्मचारी ——तथास्तु । (निष्क्रान्तः)

यौगन्धरायणः[4] ——साधु, अहमपि तत्रभवत्याभ्यनुज्ञातो गन्तुमिच्छामि[5] ।

काञ्चुकीयः —— तत्रभवत्याभ्यनुज्ञातो गन्तुमिच्छति किल।

(क) स खलु गुणवान् नाम राजा, य आगन्तुकेनाप्यनेनैवं प्रशस्यते ।

(ख) भर्तृदारिके ! किन्नुखलु अपरा स्त्री तस्य हस्तं गमिष्यति ।

(ग) मम हृदयेनैव सह मन्त्रितम् ।

१. 'तोऽपक्रान्ते' घ. पाठः. २. 'आ अइएणा (?) वि' क. पाठः. ३. 'साधयाम' ख. पाठः. ४. 'णः—अ' क. ख. ग. पाठः. ५. 'मि । पद्मा' क. पाठः.

* 'आङि नुपृच्छयोः' इति तडत्र न गणितो महाकविना । ख. संज्ञे आदर्शे 'आपृच्छामि भवन्तौ' इति न पठ्यते ।

पद्मावती — (क) अय्यस्स भइणिआ अय्येण विना उक्कण्ठिस्सिदि ।

यौगन्धरायणः — साधुजनहस्तगतैषा नोत्कण्ठिष्यति[1]† । (काञ्चुकीयमवलोक्य) गच्छामस्तावत् ।

काञ्चुकीयः — गच्छतु भवान् पुनर्दर्शनाय ।

यौगन्धरायणः — तथास्तु[2] । (निष्क्रान्तः)

काञ्चुकीयः — समय इदानीमभ्यन्तरं प्रवेष्टुम् ।

पद्मावती — (ख) अय्ये ! वन्दामि ।

तापसी — (ग) जादे ! तव सदिसं भत्तारं लभेहि ।

वासवदत्ता[3] — (घ) अय्ये ! वन्दामि[4] दाव अहं ।

तापसी — (ङ) तुवं पि अइरेण भत्तारं समासादेहि[5] ।

वासवदत्ता — (च) अणुग्गहीदह्मि ।

(क) आर्यस्य भगिनिकार्येण विनोत्कण्ठिष्यते ।

(ख) आर्ये ! वन्दे ।

(ग) जाते ! तव सदृशं भर्तारं लभस्व ।

(घ) आर्ये ! वन्दे तावदहम् ।

(ङ) त्वमपि अचिरेण भर्तारं समासादय ।

(ज) अनुगृहीतास्मि ।

---

१. 'त्कण्ठयिष्य' घ. पाठः. २. 'बाढम् ।', ३. 'त्ता गच्छामि' ख. पाठः. ४. 'गच्छामि' क. पाठः. ५. 'लभेहि' ख. पाठः.

---

† इहानुदात्तेत्वलक्षणमात्मनेपदं न कृतमनित्यत्वात् ।

काञ्चुकीयः[1]—तदागम्यताम्, इत इतो भवति!। सम्प्रति हि,

खगा वासोपेताः सलिलमवगाढो मुनिजनः
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम्।
परिभ्रष्टो दूराद् रविरपि च संक्षिप्तकिरणो
रथं व्यावृत्यासौ प्रविशति शनैरस्तशिखरम्॥ १६॥

(निष्क्रान्ताः सर्वे)

प्रथमोऽङ्कः।

---

१. 'यः — इत इतो भवत्यः (?) रा' ख. पाठ..

अथ द्वितीयोऽङ्कः ।

(ततः प्रविशति चेटी)

चेटी—(क) कुञ्जरिए! कुञ्जरिए! कहिं कहिं भट्टिदारिआ पदुमावदी । किं भणासि, एसा भट्टिदारिआ माहवीळदामण्डवस्स पस्सदो कन्दुएण कीळदित्ति[1] । जाव भट्टिदारिअं उवसप्पामि । (परिक्रम्यावलोक्य) अम्मो इअं भट्टिदारिआ[2] उक्करिदकण्णचूळिएण वाआमसञ्जादसेदबिन्दुविइत्तिदेण परिस्सन्तरमणीअदंसणेण मुहेण कन्दुएण कीळन्दी इदो एव्व आअच्छदि[3] । जाव उवसप्पिस्सं† ।

(निष्क्रान्ता)

प्रवेशकः ।

(ततः प्रविशति कन्दुकेन क्रीडन्ती पद्मावती सपरिवारा[4] वासवदत्तया सह)

वासवदत्ता—(ख) हळा! एसो दे कन्दुओ ।

(क) कुञ्जरिके! कुञ्जरिके! कुत्र कुत्र भर्तृदारिका पद्मावती । किं भणसि-एषा भर्तृदारिका माधवीलतामण्डपस्य पार्श्वतः कन्दुकेन क्रीडतीति । यावद् भर्तृदारिकामुपसर्पामि । अम्मो इयं भर्तृदारिका उत्कृतकर्णचूलिकेन व्यायाम सञ्जातस्वेदबिन्दुविचित्रितेन परिश्रान्तरमणीयदर्शनेन मुखेन कन्दुकेन क्रीडन्तीत एवागच्छति । यावदुपसाप्स्यामि ।

(ख) हला! एष ते कन्दुकः ।

---

१. 'ळन्दी त्ति' क. पाठः. २. 'आ पदुमावदी उक्कणिद' घ. पाठः. ३. 'दित्ति । जा' क. पाठः. ४. 'रा आवन्तिकावेषधारिणी वासवदत्ता च') ख. पाठः.

†'उवसप्पामि' इत्येवालम् ।

पद्मावती—(क) अय्ये! भोदु दाणिं एत्तअं।

वासवदत्ता—(ख) हळा! अदिच्चिरं कन्दुएण कीळिअ अहिअसञ्जादराआ परकेरआ विअ दे हत्था संवुत्ता।

चेटी—(ग) कीळदु कीळदु दाव भट्टिदारिआ। णिव्व-त्तीअदु दाव अअं कण्णाभावरमणीओ काळो।

पद्मावती—(घ) अय्ये! किं दाणिं मं ओहसिदुं विअ णिज्झाअसि।

वासवदत्ता—(ङ) णाहि णाहि। हळा! अधिअं अज्ज सोहदि। अभिदो विअ दे[२] अज्ज वरमुहं पेक्खामि।

पद्मावती—(च) अवेहि। मा दाणिं मं ओहस।

(क) आर्ये! भवत्विदानीमेतावत्।

(ख) हळा! अतिचिरं कन्दुकेन क्रीडित्वाधिकसञ्जातरागौ परकीयाविव ते हस्तौ संवृत्तौ।

(ग) क्रीडतु क्रीडतु तावद् भर्तृदारिका। निर्वर्त्यतां तावद् अयं कन्या-भावरमणीयः कालः।

(घ) आर्ये! किमिदानीं मामपहसितुमिव निध्यायसि।

(ङ) नहि नहि। हळा! अधिकमद्य शोभते। अभित इव तेऽद्य वरमुखं पश्यामि।

(च) अपेहि। मेदानीं मामपहस।

---

१. 'ळा! किंणिमित्तं वारेसि। अ' घ. पाठः. २. 'दे व' ख. पाठः.

वासवदत्ता — (क) एसह्मि तुह्णीआ भविस्सम्महा-सेणवहू[1]! ।

पद्मावती — (ख) को एसो महासेणो णाम ।

वासवदत्ता — (ग) अत्थि उज्जइणीओ राआ पज्जोदो णाम । तस्स बळपरिमाणणिव्वुत्तं णामहेअं महासेणो त्ति ।

चेटी — (घ) भट्टिदारिआ तेण[2] रञ्ञा सह सम्बन्धं[3] णेच्छदि ।

वासवदत्ता — (ङ) अह केण खु दाणिं अभिळसदि ।

चेटी — (च) अत्थि वच्छराओ उअअणो[4] णाम । तस्स गुणाणि भट्टिदारिआ अभिळसदि ।

वासवदत्ता — (आत्मगतम्) (छ) अय्यउत्तं भत्तारं अभि-ळसदि । (प्रकाशम्) केण कारणेण ।

(क) एषास्मि तूष्णीका भविष्यन्महासेनवधूः! ।

(ख) क एष महासेनो नाम ।

(ग) अस्ति उज्जयिन्या राजा प्रद्योतो नाम । तस्य बलपरिमाणनिर्वृत्तं नामधेयं महासेन इति ।

(घ) भर्तृदारिका तेन राज्ञा सह संबन्धं नेच्छति ।

(ङ) अथ केन खल्विदानीमभिलषति ।

(च) अस्ति वत्सराज उदयनो नाम । तस्य गुणान् भर्तृदारिकाभिलषति ।

(छ) आर्यपुत्रं भर्तारमभिलषति । केन कारणेन ।

---

१. 'इ' ख. पाठः. २. 'हूए' । क. घ. पाठः. ३. 'ण भत्ता स' क. पाठः. ४. 'न्धमिच्छ' क. पाठः. ५. 'दअ' ख. पाठः.

चेटी — (क) साणुक्कोसो त्ति ।

वासवदत्ता — (आत्मगतम्) (ख) जाणामि जाणामि । अअं वि[1] जणो एव्वं उम्मादिदो ।

चेटी — (ग) भट्टिदारिए ! जदि सो राआ विरूवभवे ।

वासवदत्ता — (घ) णहि णहि । दंसणीओ एव्व ।

पद्मावती — (ङ) अय्ये ! कहं तुवं जाणासि ।

वासवदत्ता — (आत्मगतम्) (च) अय्यउत्तपक्खवादेण अदिक्कन्दो समुदाआरो । किं दाणिं करिस्सं । होदु, दिट्ठं । (प्रकाशम्) हळा ! एव्वं उज्जइणीओ जणो मन्तेदि ।

पद्मावती — (छ) जुज्जइ । णखु एसो उज्जइणीदुळ्ळहो । सव्वजणमणोभिरामं खु सोभग्गं णाम ।

(क) सानुक्रोश इति ।

(ख) जानामि जानामि । अयमपि जन एवमुन्मादितः ।

(ग) भर्तृदारिके ! यदि स राजा विरूपो भवेत् ।

(घ) नहि नहि । दर्शनीय एव ।

(ङ) आर्ये ! कथं त्वं जानासि ।

(च) आर्यपुत्रपक्षपातेनातिक्रान्तः समुदाचारः । किमिदानीं करिष्यामि । भवतु, दृष्टम् । हळा ! एवमुज्जयिन्या जनो मन्त्रयते ।

(छ) युज्यते । न खल्वेष उज्जयिनीदुर्लभः । सर्वजनमनोभिरामं खलु सौभाग्यं नाम ।

---

१. 'विअ ज' ख. पाठः.

(प्रविश्य)[1]

धात्री — (क) जेदु भट्टिदारिआ । भट्टिदारिए ! दिण्णासि ।

वासवदत्ता — (ख) अय्ये ! कस्स ।

धात्री — (ग) वच्छराअस्स उदअणस्स ।

वासवदत्ता — (घ) अह कुसळी सो राआ ।

धात्री — (ङ) कुसळी सो आअदो । *तस्स भट्टिदारिआ पडिच्छिदा अ ।

वासवदत्ता — (च) अच्चाहिदं[2] ।

धात्री — (छ) किं एत्थ अच्चाहिदं ।

वासवदत्ता — (ज) ण हु किञ्चि । तह णाम सन्तप्पिअ उदासीणो होदि त्ति ।

(क) जयतु भर्तृदारिका । भर्तृदारिके ! दत्तासि ।

(ख) आर्ये ! कस्मै ।

(ग) वत्सराजायोदयनाय ।

(घ) अथ कुशली स राजा ।

(ङ) कुशली स आगतः । तस्य भर्तृदारिका प्रतीष्टा च ।

(च) अत्याहितम् ।

(छ) किमत्रात्याहितम् ।

(ज) न खलु किञ्चित् । तथा नाम सन्तप्योदासीनो भवतीति ।

---

१. 'ततः प्रविशति धात्री)' क. पाठः २. 'दं खु एदं' ख. पाठः.

---

* तेनेत्यर्थः ।

धात्री—(क) अय्ये! आअमप्पहाणाणि सुळहपय्यवत्थाणाणि[1] महापुरुसहिअआणि होन्ति।

वासवदत्ता—(ख) अय्ये! सअं एव्व तेण वरिदा।

धात्री—(ग) णहि णहि। अण्णप्पओअणेण इह आअदस्स अभिजणविञ्ञाणवओरूवं पेक्खिअ सअं एव्व महाराएण दिण्णा।

वासवदत्ता—(आत्मगतम्) (घ) एव्वं। अणवरद्धो[2] दाणिं एत्थ अय्यउत्तो।

(प्रविश्यापरा)

चेटी—(ङ) तुवरदु तुवरदु दाव अय्या[3]। अज्ज एव्व किळ सोभणं णक्खत्तं। अज्ज एव्व कोदुअमङ्गळं कादव्वं त्ति अह्माणं भट्टिणी भणादि।

(क) आर्ये! आगमप्रधानानि सुलभपर्यवस्थानानि महापुरुषहृदयानि भवन्ति।

(ख) आर्ये! स्वयमेव तेन वृता।

(ग) नहि नहि। अन्यप्रयोजनेनेहागतस्याभिजनविज्ञानवयोरूपं दृष्ट्वा स्वयमेव महाराजेन दत्ता।

(घ) एवम्। अनपराद्ध इदानीमत्रार्यपुत्रः।

(ङ) त्वरतां त्वरतां तावदार्या। अद्यैव किल शोभनं नक्षत्रम्। अद्यैव कौतुकमङ्गलं कर्तव्यमित्यस्माकं भट्टिनी भणति।

---

१. 'त्थावणा' ख. पाठः. २. 'राधो दाणिं अय्य' क. पाठः. ३. 'भट्टिदारिआ। अ' ख. पाठः.

वासवदत्ता (क) — (आत्मगतम्) जह जह तुवरदि, तह तह अन्धीकरेदि[1] मे हिअअं ।

धात्री — (ख) एदु एदु भट्टिदारिआ ।

(निष्क्रान्ताः सर्वे)

द्वितीयोऽङ्कः ।

(क) यथा यथा त्वरते, तथा तथान्धीकरोति मे हृदयम् ।

(ख) एत्वेतु भर्तृदारिका ।

---

१. 'अन्धआरेण पिहिदं विअ मे' ख. पाठः.

अथ तृतीयोऽङ्कः ।

(ततः प्रविशति विचिन्तयन्ती[1] वासवदत्ता)

वासवदत्ता — (क) विवाहामोदसङ्कुले अन्तेउरचउस्साळे परित्तजिअ पदुमावदिं इह आअदह्मि पमदवणं । जाव दाणिं भाअधेअणिव्वुत्तं[2] दुःखं विणोदेमि । (परिक्रम्य) अहो अच्चाहिदं । अय्यउत्तो वि णाम परकेरओ संवुत्तो । जाव उवविसामि । (उपविश्य) धञ्ञा खु चक्कवाअवहू, जा अण्णोण्णविरहिदा ण जीवइ । ण खु अहं पाणाणि परित्तजामि । अय्यउत्तं पेक्खामि त्ति एदिणा मणोरहेण जीवाम्मि मन्दभाआ ।

(ततः प्रविशति पुष्पाणि गृहीत्वा चेटी)

चेटी — (ख) कहिंणुखु गदा अय्या आवन्तिआ । (परिक्रम्यावलोक्य) अम्मो[3] इअं चिन्तासुञ्ञहिअआ णीहारपडिहदचन्दलेहा विअ अमण्डिदभद्दअं वेसं धारअन्दी पिअङ्गुसिळा-

---

(क) विवाहामोदसङ्कुले अन्तःपुरचतुश्शाले परित्यज्य पद्मावतीमिहागतास्मि प्रमदवनम् । यावदिदानीं भागधेयनिर्वृत्तं दुःखं विनोदयामि । अहो अत्याहितम् । आर्यपुत्रोऽपि नाम परकीयः संवृत्तः । यावद् उपविशामि । धन्या खलु चक्रवाकवधूः, यान्योन्यविरहिता न जीवति । न खल्वहं प्राणान् परित्यजामि । आर्यपुत्रं पश्यामीति एतेन मनोरथेन जीवामि मन्दभागा ।

(ख) क्वनुखलु गता आर्यावन्तिका । अम्मो इयं चिन्ताशून्यहृदया नीहारप्रतिहतचन्द्रलेखेवामण्डितभद्रकं वेषं धारयन्ती प्रियङ्गुशिलापट्टके उप-

१. 'ति वा' क. पाठः. २. 'णिव्वुत्तं' (?), ३. 'म्मो' ख. पाठः.

पट्टए उवविट्ठा । जाव उवसप्पामि । (उपसृत्य) अय्ये ! आवन्तिए ! को काळो, तुमं अण्णेसामि ।

वासवदत्ता[1] — (क) किण्णिमित्तं ।

चेटी — (ख) अह्माअं भट्टिणी[2] भणादि — महाकुळप्पसूदा सिणिद्धा णिउणा त्ति इमं दाव कोदुअमाळिअं [3]गुह्मदु अय्या ।

वासवदत्ता[4] — (ग) अह कस्स किळ गुह्मिदव्वं ।

चेटी — (घ) अह्माअं भट्टिदारिआए ।

वासवदत्ता — (ङ) (आत्मगतम्) एदं पि मए कत्तव्वं आसी । अहो अकरुणा खु इस्सरा ।

चेटी — (च) अय्ये ! मा दाणि [6]अञ्जं चिन्तिअ । एसो जामादुओ मणिभूमीए ह्णाअदि । सिग्घं दाव गुह्मदु अय्या ।

विष्टा ! यावदुपसर्पामि । आर्ये ! आवन्तिके ! कः कालः, त्वामन्विष्यामि ।

(क) किन्निमित्तम् ।

(ख) अस्माकं भट्टिनी भणति — महाकुलप्रसूता स्निग्धा निपुणेति इमां तावत् कौतुकमालिकां गुम्फत्वार्या ।

(ग) अथ कस्मै किल गुम्फितव्यम् ।

(घ) अस्माकं भर्तृदारिकायै ।

(ङ) एतदपि मया कर्तव्यमासीत् । अहो अकरुणाः खल्वीश्वराः ।

(च) आर्ये ! मेदानीमन्यच्चिन्तयित्वा । एष जामाता मणिभूम्यां स्नायति । शीघ्रं तावद् गुम्फत्वार्या ।

१. 'त्ता—(आत्मगतम्) कि', २. 'णीदारिआ भ' क. पाठः. ३. 'गुंहदु किळ अ', ४. 'मा क' ख. पाठः. ५. 'अऊ दा' घ. पाठः. ६. 'अणुचि' ख. पाठः.

वासवदत्ता —(आत्मगतम्) (क) ण सक्कुणोमि अण्णं चिन्तेदुं । (प्रकाशम्) हळा! किं दिट्ठो जामादुओ ।

चेटी —(ख) आम दिट्ठो भट्टिदारिआए सिणेहेण अह्माअं कोदूहळेण अ ।

वासवदत्ता —(ग) कीदिसो जामादुओ ।

चेटी —(घ) अय्ये! भणामि दाव, ण ईरिसो दिट्ठपुरुवो।

वासवदत्ता —(ङ) हळा! भणाहि भणाहि, किं दंसणीओ ।

चेटी —(च) सअं खु भअवं सरचावहीणो कामदेवो[2] त्ति ।

वासवदत्ता —(छ) होदु[3] एत्तअं ।

चेटी —(ज) किण्णिमित्तं वारेसि ।

वासवदत्ता —(झ) अजुत्तं परपुरुससङ्कित्तणं सोदुं ।

(क) न शक्नोम्यन्यच्चिन्तयितुम् । हला! किं दृष्टो जामाता ।

(ख) आं दृष्टो भर्तृदारिकायाः स्नेहेनास्माकं कौतूहलेन च ।

(ग) कीदृशो जामाता ।

(घ) आर्ये! भणामि तावद्, नेदृशो दृष्टपूर्वः ।

(ङ) हला! भण भण, किं दर्शनीयः ।

(च) स्वयं खलु भगवाञ्छरचापहीनः कामदेव इति ।

(छ) भवत्वेतावत् ।

(ज) किन्निमित्तं वारयसि ।

(झ) अयुक्तं परपुरुषसङ्कीर्तनं श्रोतुम् ।

---

१. 'व ईदिसो जामादुओ अदि' घ. पाठः. २. 'मो त्ति' क. पाठः. ३. 'दु दाणिं ए' ख. पाठः.

चेटी —(क) तेण हि गुह्मदु[1] अय्या सिग्घं ।

वासवदत्ता —(ख) आणेहि[2] । (आत्मगतम्) इअं गुह्मामि मन्दभाआ । (वर्जयित्वा[3] विलोक्य) इमं दाव ओसहं किं णाम ।

चेटी —(ग) अविहवाकरणं णाम ।

वासवदत्ता —(घ) (आत्मगतम्) इदं बहुसो गुह्मिदव्वं मम अ पदुमावदीए अ । (प्रकाशम्) इमं दाव ओसहं किं णाम ।

चेटी —(ङ) सवत्तिमद्दणं णाम ।

वासवदत्ता —(च) इदं ण गुह्मिदव्वं ।

चेटी —(छ) कीस ।

वासवदत्ता —(ज) उवरदा तस्स भय्या, तं णिप्पओअणं त्ति ।

(क) तेन हि गुम्फत्वार्या शीघ्रम् ।

(ख) आनय । इयं गुम्फामि मन्दभागा । इदं तावदौषधं किं नाम ।

(ग) अविधवाकरणं नाम ।

(घ) इदं बहुशो गुम्फितव्यं मम च पद्मावत्याश्च । इदं तावदौषधं किंनाम ।

(ङ) सपत्नीमर्दनं नाम ।

(च) इदं न गुम्फितव्यम् ।

(छ) कस्मात् ।

(ज) उपरता तस्य भार्या, तन्निष्प्रयोजनमिति ।

---

१. 'दु सि' ख. पाठः. २. 'इअं गुह्मामि । आणेहि दाव । चेटी—गह्नदु अय्या । वासवदत्ता—(आवर्जयित्वा) इदं दाव' घ. पाठः. ३. 'आवर्ज' ख. पाठः.

---

* अपुष्पं किमपि गुम्फनप्रसङ्गे हस्तप्राप्तं परिहृत्येत्यर्थः ।

(प्रविश्यापरा)

चेटी —(क) तुवरदु[1] तुवरदु अय्या । एसो जामादुओ अविहवाहिं अब्भन्तरचउस्सालं पवेसीअदि ।

वासवदत्ता —(ख) अइ[2]! वदामि, गह्ण एदं ।

चेटी — (ग) सोहणं[3] । अय्ये! गच्छामि दाव अहं ।

(उभे निष्क्रान्ते)

वासवदत्ता[4] —(घ) गदा एसा । अहो अच्चाहिदं । अय्यउत्तो वि णाम परकेरओ संवुत्तो[5] । अविदा* सय्याए मम दुक्खं विणोदेमि, जदि णिद्दं लभामि ।

(निष्क्रान्ता)

तृतीयोऽङ्कः ।

(क) त्वरतां त्वरतामार्या । एष जामाता अविधवाभिरभ्यन्तरचतुश्शालं प्रवेश्यते ।

(ख) अयि! वदामि, गृहाणैतत् ।

(ग) शोभनम् । आर्ये! गच्छामि तावदहम् ।

(घ) गतैषा । अहो अत्याहितम् । आर्यपुत्रोऽपि नाम परकीयः संवृत्तः । अविदा शय्यायां मम दुःखं विनोदयामि, यदि निद्रां लभे ।

---

१. 'दु दाव अय्या । जा' क. पाठः. २. 'इअं तुवरामि' घ. पाठः ३. 'हला! घासो ओणअव्वे । ग' ख. पाठः, 'हला! ग', ४. 'त्ता—अ', ५. 'त्तो । (नि' क., 'त्ता । अहं पि सेज्जाए' घ. पाठः.

---

*. 'अविदा' इति निर्वेदे ।

अथ चतुर्थोऽङ्कः ।

(ततः प्रविशति विदूषकः)

विदूषकः—(सहर्षम्) (क) भो! दिट्ठिआ तत्तहोदो वच्छराअस्स अभिप्पेदविवाहमङ्गळरमणिज्जो काळो दिट्ठो। भो! को णाम एदं जाणादि—तादिसे वयं अणत्थसाळिळावत्ते पक्खित्ता उण उम्मज्जिस्सामो त्ति । इदाणिं पासादेसु वसीअदि, अन्देउरदिग्घिआसु ह्लाईअदि, पकिदिमउरसुउमाराणि मोदअखज्जआणि खज्जीअन्ति त्ति अणच्छरसंवासो उत्तरकुरुवासो मए अणुभवीअदि । एक्को खु महन्तो दोसो, मम आहारो सुट्ठु ण परिणमदि । सुप्पच्छदणाए सय्याए णिद्दं ण ळभामि, जह वादसोणिदं अभिदो विअ वत्तदि त्ति पेक्खामि । भो *सुहं णामअपरिभूदं अकळळवत्तं च ।

(क) भोः! दिष्ट्या तत्रभवतो वत्सराजस्याभिप्रेतविवाहमङ्गलरमणीयः कालो दृष्टः। भोः! को नामैतज्जानाति—तादृशे वयमनर्थसलिलावर्ते प्रक्षिप्ताः पुनरुन्मङ्क्ष्याम इति । इदानीं प्रासादेषु उष्यते, अन्तःपुरदीर्घिकासु स्नायते, प्रकृतिमधुरसुकुमाराणि मोदकखाद्यानि खाद्यन्त इति अनप्सरस्संवास उत्तरकुरुवासो मयानुभूयते । एकः खलु महान् दोषः, ममाहारः सुष्ठु न परिणमति, सुप्रच्छदनायां शय्यायां निद्रां न लभे, यथा वातशोणितमभित इव वर्तत इति प्रेक्षे । भोः! सुखं नामयपरिभूतमकल्यवर्तं च ।

१. 'पळम' क. पाठः. २. 'हणगा अविभू (?)' ख. पाठः.

*आमयपरिभूतं कल्यवर्तशून्यं च सुखं न भवतीत्यर्थः ।

(ततः प्रविशति चेटी)

चेटी— (क) कहिंणुखु गदो अय्यवसन्तओ। (परिक्रम्य) अह्मो[1] एसो अय्यवसन्तओ। (उपगम्य[2]) अय्य! बसन्तअ! को कालो, तुमं अण्णेसामि।

विदूषकः— (दृष्ट्वा) (ख) किंणिमित्तं भद्दे! मं अण्णेसेसि[3]।

चेटी— (ग) अह्माणं भट्टिणी भणादि—अवि ह्णादो जामादुओ त्ति।

विदूषकः— (घ) किंणिमित्तं भोदि[5]! पुच्छदि*।

चेटी— (ङ) किमण्णं[6]। सुमणावण्णअं आणेमि त्ति।

विदूषकः— (च) ह्णादो तत्तभवं। सव्वं आणेदु भोदी वज्जिअ भोअणं।

चेटी— (छ) किंणिमित्तं वारेसि भोअणं।

(क) कुत्रनुखलु गत आर्यवसन्तकः। अहो एष आर्यवसन्तकः। आर्य! वसन्तक! कः कालः, त्वामन्वेषे।

(ख) किन्निमित्तं भद्रे! मामन्वेषसे।

(ग) अस्माकं भट्टिनी भणति—अपि स्नातो जामातेति।

(घ) किन्निमित्तं भवति! पृच्छति।

(ङ) किमन्यत्। सुमनोवर्णकमानयामीति।

(च) स्नातस्तत्रभवान्। सर्वमानयतु भवती वर्जयित्वा भोजनम्।

(छ) किन्निमित्तं वारयसि भोजनम्।

१. 'म्यावलोक्य'), २. 'अम्मे अ', ३. 'सुत्र)' ख. पाठः. ४. 'सइ।' क. पाठः. ५. 'दी', ६. 'किममणसुमतणावणअ आणेदु' (?) ख. पाठः.

* भट्टिनीति शेषः।

विदूषकः—(क) अधण्णस्स मम कोइळाणं अक्खिपरिवट्टो विअ कुक्खिपरिवट्टो संवुत्तो ।

चेटी—(ख) ईदिसो एव्व होहि ।

विदूषकः—(ग) गच्छदु भोदी । जाव अहं वि तत्तहोदो सआसं गेच्छामि ।

(निष्क्रान्तौ)

प्रवेशकः ।

(ततः प्रविशति सपरिवारा पद्मावती आवन्तिकावेषधारिणी वासवदत्ता च)

चेटी—(घ) किंणिमित्तं भट्टिदारिआ पमदवणं आअदा ।

पद्मावती—(ङ) हळा ! ताणि[2] दाव सेहाॅळिआगुह्मआणि पेक्खामि कुसुमिदाणि वा ण वेत्ति ।

चेटी—(च) भट्टिदारिए ! ताणि कुसुमिदाणि णाम,

(क) अधन्यस्य मम कोकिलानामक्षिपरिवर्त इव कुक्षिपरिवर्तः संवृत्तः ।

(ख) ईदृश एव भव ।

(ग) गच्छतु भवती । यावदहमपि तत्रभवतः सकाशं गच्छामि ।

(घ) किन्निमित्तं भर्तृदारिका प्रमदवनमागता ।

(ङ) हळा ! ते तावत् शेफालिकागुल्मकाः प्रेक्षे कुसुमिता वा नवेति ।

(च) भर्तृदारिके ! ते कुसुमिता नाम, प्रवालान्तरितैरिव मौक्तिकालम्ब-

---

१. 'गमिस्सं ।' घ. पाठः. २. 'ती वा' क. पाठः. ३. 'गि से' ख. पाठः. ४. 'वा' क. पाठः.

पत्ताळन्तरिदेहिं विअ मोत्तिआलम्बएहिं आइदाणि कुसुमेहिं।

पद्मावती —(क) हळा! जदि एव्वं, किं दाणिं विळम्बेसि।

*चेटी —(ख) तेण हि इमस्सिं सिलावट्टए मुहुत्तअं उपविसदु भट्टिदारिआ। जाव अहं वि कुसुमावचअं करेमि।

पद्मावती —(ग) अय्ये! किं एत्थ उपविसामो।

वासवदत्ता —(घ) एव्वं होदु।

(उभे उपविशतः)

चेटी —(तथा कृत्वा) (ङ) पेक्खदु पेक्खदु भट्टिदारिआ।

कैराचिताः कुसुमैः।

(क) हला! यद्येवं, किमिदानीं विलम्बसे।

(ख) तेन ह्यस्मिन् शिलापट्टके मुहूर्तकमुपविशतु भर्तृदारिका। यावदहमपि कुसुमावचयं करोमि।

(ग) आर्ये! किमत्रोपविशावः।

(घ) एवं भवतु।

(ङ) पश्यतु पश्यतु भर्तृदारिका। अद्धा मनःशिलापट्टकैरिव

---

१. 'टी—पे' क. पाठः.

---

* 'चेटी' इत्यादि 'उपविशतः' इत्यन्तं ख. पुस्तके नास्ति।

अद्धा[1] मणसिळावट्टएहिं विअ सेहाळिआकुसुमेहि पूरिअं[2] मे अञ्जळिं[3] ।

पद्मावती—(क) (दृष्ट्वा) अहो विइत्तदा कुसुमाणं । पेक्खदु पेक्खदु अय्या ।

वासवदत्ता[4]—(ख) अहो दस्सणीअदा कुसुमाणं ।

चेटी—(ग) भट्टिदारिए! किं भूयो अवइणुस्सं[5] ।

पद्मावती—(घ) हळा! मा मा भूयो[6] अवइणिअ ।

वासवदत्ता—(ङ) हळा! किंणिमित्तं वारेसि ।

पद्मावती—(च) अय्यउत्तो[7]* इह आअच्छिअ इमं[8] कुसुमसमिद्धिं पेक्खिअ सम्माणिदा भवेअं[9] ।

शेफालिकाकुसुमैः पूरितो मेऽञ्जलिः ।

(क) अहो विचित्रता कुसुमानाम् । पश्यतु पश्यत्वार्या ।

(ख) अहो दर्शनीयता कुसुमानाम् ।

(ग) भर्तृदारिके! किं भूयोऽवचेष्यामि ।

(घ) हला! मा मा भूयोऽवचित्य ।

(ङ) हळा! किन्निमित्तं वारयसि ।

(च) आर्यपुत्र इहागत्येमां कुसुमसमृद्धिं दृष्ट्वा सम्मानिता भवेयम् ।

---

१. 'अ(?)मण' ख., अद्रुमणिसि' घ. पाठः. २. 'दा' ख., ३. 'अळी', ४. 'त्ता—अव्वो(?) । चे', ५. 'वि अविउणिस्सं' ख., ६. 'हयो अविइणुअ ।' ख. पाठः. ७. 'त्तो वि दाव इ' घ. पाठः. ८. 'ह', ९. 'अ' ख. पाठः.

---

* 'अय्यउत्तेण' इति पाठो लेखकप्रमादात् भ्रष्टो भवेत् ।

वासवदत्ता—(क) हळा! पिओ दे भत्ता।

पद्मावती—(ख) अय्ये! ण आणामि, अय्यउत्तेण विरहिदा उक्कण्ठिदा[1] होमि।

वासवदत्ता—(आत्मगतम्) (ग) दुक्खरं खु अहं करेमि इअं वि णाम एव्वं मन्तेदि।

चेटी—(घ) अभिजादं[2] खु भट्टिदारिआए[3] मन्तिदं—पिओ मे भत्तत्ति।

पद्मावती—(ङ) एक्को[4] खु मे सन्देहो।

वासवदत्ता—(च) किं किं।

पद्मावती—(छ) जह मम अय्यउत्तो, तह एव्व अय्याए वासवदत्ताए त्ति।

वासवदत्ता—(ज) अदो वि[5] अधिअं।

(क) हला! प्रियस्ते भर्ता।

(ख) आर्ये! न जानामि, आर्यपुत्रेण विरहितोत्कण्ठिता भवामि।

(ग) दुष्करं खल्वहं करोमि। इयमपि नामैवं मन्त्रयते।

(घ) अभिजातं खलु भर्तृदारिकया मन्त्रितं—प्रियो मे भर्तेति।

(ङ) एकः खलु मे सन्देहः।

(च) किं किम्।

(छ) यथा ममार्यपुत्रस्तथैवार्याया वासवदत्ताया इति।

(ज) अतोऽप्यधिकम्।

---

१. 'दा विअ हो', २. 'ज्जा भ', ३. 'अम' ख. पाठः. ४. 'एत्तओ मे', ५. 'हि' घ. पाठः.

पद्मावती—(क) कहं तुवं जाणासि ।

वासवदत्ता—(आत्मगतम्) (ख) हं[1], अय्यउत्तपेक्ख[2]वादेण अदिक्कन्दो समुदाआरो[3] । एव्वं दाव भणिस्सं । (प्रकाशम्) जइ अप्पो सिणेहो, सा सजणं[4] ण परित्तजदि[5] ।

पद्मावती—(ग) होदव्वं[6] ।

चेटी—(घ) भट्टिदारिए! साहु भट्टारं भणाहि—अहं पि वीणं सिक्खिस्सामि त्ति ।

पद्मावती—(ङ) उत्तो[7] मये अय्यउत्तो ।

वासवदत्ता—(च) तदो किं भणिदं ।

पद्मावती[8]—(छ) अभणिअ किञ्चि दिग्घं णिस्ससिअ तुह्णीओ[9] संवुत्तो ।

(क) कथं त्वं जानासि ।

(ख) हम्, आर्यपुत्रपक्षपातेनातिक्रान्तः समुदाचारः । एवं तावद् भणिष्यामि । यद्यल्पः स्नेहः, सा स्वजनं न परित्यजति ।

(ग) भवितव्यम् ।

(घ) भर्तृदारिके! साधु भर्तारं भण—अहमपि वीणां शिक्षिष्य इति ।

(ङ) उक्तो मयार्यपुत्रः ।

(च) ततः किं भणितम् ।

(छ) अभणित्वा किञ्चिद् दीर्घं निःश्वस्य तूष्णीकः संवृत्तः ।

---

१. 'हा' ख. पाठः. २. 'सिणेहेण' घ. पाठः. ३. 'रो भोदु ए, ४. 'स्सत्तणं', ५. 'इ' ख. पाठः ६. 'जुज्जइ' । घ. पाठः. ७. 'त्तो' क. पाठः. ८. 'ती – कि', ९. 'ह्णि' ख. पाठः.

वासवदत्ता—(क) तदो तुवं किं[1] विअ तक्केसि ।

पद्मावती—(ख) तक्केमि अय्याए वासवदत्ताए गुणाणि सुमरिअ दक्खिणदाए मम अग्गदो ण रोदिदित्ति ।

वासवदत्ता—(आत्मगतम्) (ग) धञ्जा खु ह्मि, जदि एव्वं सच्चं भवे ।

(ततः प्रविशति राजा विदूषकश्च)

विदूषकः—(घ) ही ही । पे[2]चिअपडिअबन्धुजीवकुसुमविरळे[3]वादरमणिज्जं पमदवणं । इदो[4] दाव भवं ।

राजा—वयस्य वसन्तक! अयमयमागच्छामि ।

कामेनोज्जयिनीं गते मयि तदा कामप्यवस्थां गते
दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः ।
तै[5]रद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं
पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः ॥ १ ॥

(क) ततस्त्वं किमिव तर्कयसि ।

(ख) तर्कयाम्यार्याया वासवदत्ताया गुणान् स्मृत्वा दक्षिणतया ममाग्रतो न रोदितीति ।

(ग) धन्या खल्वस्मि, यद्येवं सत्यं भवेत् ।

(घ) ही ही । प्रचितपतितबन्धुजीवकुसुमविरलपातरमणीयं प्रमदवनम् । इतस्तावद् भवान् ।

---

१. 'किं ति त', २ 'णवविवाहधिअब', ३. 'ळसंपातर', ४. 'दो इदो दा', ५. 'इ' ख. पाठः.

विदूषकः—(क) कहिंणुखु गदा तत्तहोदी पदुमावदी, ळदामण्डवं गदा भवे, उदाहो असणकुसुमसञ्चिदं वग्घचम्मावगुण्ठिदं विअ पव्वदतिळअं णाम सिळापट्टअं गदा भवे, आदु अधिअकडुअगन्धसत्तच्छदवणं पविट्ठा भवे, अहव आळिहिदमिअपक्खिसङ्कुळं दारुपव्वदेअं गदा भवे। (ऊर्ध्वमवलोक्य) ही ही सरअकाळणिम्मळे अन्तरिक्खे पसादिअबळदेवबाहुदंसणीअं सारसपन्ति जाव समाहिदं गच्छन्ति पेक्खदु दाव भवं।

राजा—वयस्य! पश्याम्येनाम्,

ऋज्वायतां च विरलां च नतोन्नतां च
सप्तर्षिवंशकुटिलां च निवर्तनेषु।
निर्मुच्यमानभुजगोदरनिर्मलस्य
सीमामिवाम्बरतलस्य विभज्यमानाम्॥ २॥

चेटी—(ख) पेक्खदु पेक्खदु भट्टिदारिआ एदं कोक-

(क) कुत्रनुखलु गता तत्रभवती पद्मावती, लतामण्डपं गता भवेद्, उताहो असनकुसुमसञ्चितं व्याघ्रचर्मावगुण्ठितमिव पर्वततिलकं नाम शिलापट्टकं गता भवेद्, अथवा अधिककटुकगन्धसप्तच्छदवनं प्रविष्टा भवेद्, अथवालिखितमृगपक्षिसङ्कुलं दारुपर्वतकं गता भवेत्। ही ही शरत्कालनिर्मलेऽन्तरिक्षे प्रसा(दि?रि)तबलदेवबाहुदर्शनीयां सारसपङ्क्तिं यावत् समाहितं गच्छन्तीं प्रेक्षतां तावद् भवान्।

(ख) प्रेक्षतां प्रेक्षतां भर्तृदारिका एतां कोकनदमालापाण्डुररमणीयां

---

१. 'इ', २. 'दग', ३. 'आ सारसव(ती?त्ती) जाव समाहिदागच्छदि।' ख. पाठः.

णदमाळापण्डररमणीअं सारसपन्तिं जाव समाहिदं गच्छन्तिं। अम्मो भट्टा।

पद्मावती — (क) ह्[2]ं अय्यउत्तो। अय्ये! तव कारणादो अय्यउत्तदंसणं परिहरामि। ता इमं दाव माहवीळदामण्डवं पविसामो।

वासवदत्ता — (ख) एव्वं होदु।

(तथा कुर्वन्ति)

विदूषकः — (ग) तत्तहोदी पदुमावदी इह आअच्छिअ णिग्गदा भवे।

राजा — कथं भवान् जानाति।

विदूषकः — (घ) इमाणि अवइदं[3]कुसुमाणि सेफाळिआगुच्छआणि पेक्खदु दाव भवं।

सारसपङ्क्तिं यावत् समाहितं गच्छन्तीम्। अम्मो भर्ता।

(क) हम् आर्यपुत्रः। आर्ये! तव कारणादार्यपुत्रदर्शनं परिहरामि। तदिमं तावन्माधवीलतामण्डपं प्रविशामः।

(ख) एवं भवतु।

(ग) तत्रभवती पद्मावतीहागत्य निर्गता भवेत्।

(घ) इमानपचितकुसुमान् शेफालिकागुच्छकान् प्रेक्षतां तावद् भवान्।

---

१. 'णिज्जसारपन्ती जाव समाहिदा गच्छदि।' ख. पाठः. २. 'हा अ' ख., 'हळा! अ' क. पाठः. ३. 'दाणि सेफाळिआकुसुमाणि पे' ख. पाठः.

राजा — अहो विचित्रता कुसुमस्य वसन्तक ! ।

वासवदत्ता — (आत्मगतम्) (क) वसन्तअसङ्कित्तणेण अहं पुण जाणामि उज्जइणीए वत्तामि त्ति ।

राजा — वसन्तक ! अस्मिन्नेवासीनौ शिलातले पद्मावतीं प्रतीक्षिष्यावहे ।

विदूषकः — (ख) भो ! तह । (उपविश्योत्थाय) ही ही सरअकाळतिक्खो दुस्सहो आदवो । ता इमं दाव माहवीमण्डवं पविसामो ।

राजा — बाढम् । गच्छाग्रतः ।

विदूषकः — (ग) एव्वं होदु ।

(उभौ परिक्रामतः)

पद्मावती — (घ) सव्वं आउळं कत्तुकामो अय्यवसन्तओ । किं दाणिं करेह्म ।

चेटी — (ङ) भट्टिदारिए ! एदं महुअरपरिणिळीणं ओळंबळदं ओधूय भट्टारं वारइस्सं ।

(क) वसन्तकसङ्कीर्तनेनाहं पुनर्जानामि उज्जयिन्यां वर्त इति ।

(ख) भोस्तथा । ही ही शरत्कालतीक्ष्णो दुःसह आतपः । तदिमं तावन्माधवीमण्डपं प्रविशावः ।

(ग) एवं भवतु ।

(घ) सर्वमाकुलं कर्तुकाम आर्यवसन्तकः । किमिदानीं कुर्मः ।

(ङ) भर्तृदारिके ! एतां मधुकरपरिनिलीनामवलम्बलतामवधूय भर्तारं वारयिष्यामि ।

---

१. 'य) स' ख. पाठः.

पद्मावती—(क) एव्वं करेहि ।

(चेटी तथा करोति)

विदूषकः—(ख) अविह अविह, चिट्ठदु चिट्ठदु दाव भवं ।

राजा—किमर्थम्[1] ।

विदूषकः—(ग) दासीएपुत्तेहि महुअरेहि पीडिदो म्हि ।

राजा—मा मा भवानेवम् । मधुकरसन्त्रासः[2] परिहार्यः । पश्य,

मधुमदकला मधुकरा मदनार्ताभिः प्रियाभिरुपगूढाः ।
पादन्यासविषण्णा वयमिव कान्तावियुक्ताः स्युः ॥ ३ ॥

तस्मादिहैवासिष्यावहे ।

विदूषकः—(घ) [3]एव्वं होदु ।

(उभावुपविशतः)

पद्मावती—(ङ) दिट्ठिआ उवविट्ठो अय्यउत्तो ।

(क) एवं कुरु ।
(ख) अविह अविह, तिष्ठतु तिष्ठतु तावद् भवान् ।
(ग) दास्याःपुत्रैर्मधुकरैः पीडितोऽस्मि ।
(घ) एवं भवतु ।
(ङ) दिष्ट्योपविष्ट आर्यपुत्रः ।

---

१. 'अथकिम्', २. 'सं' ख. पाठः. ३. 'भो तह ।' घ, पाठः.

वासवदत्ता — (आत्मगतम्) (क) दिट्ठिआ पकिदित्थ-सरीरो अय्यउत्तो ।

चेटी — (ख) भट्टिदारिए ! रुद्धा खु ह्म वयं । भट्टिदारिए ! सस्सुपादा खु अय्याए दिट्ठी ।

वासवदत्ता — (ग) एसा खु महुअराणं अविणआदो कासकुसुमरेणुणा पडिदेण सोदआ मे दिट्ठी ।

पद्मावती — (घ) जुज्जइ ।

विदूषकः — (ङ) भो ! सुण्णं खु इदं पमदवणं । पुच्छिदव्वं किञ्चि अत्थि । पुच्छामि भवन्तं ।

राजा — छन्दतः ।

विदूषकः — (च) का भवदो पिआ, तदाणिं तत्तहोदी वासवदत्ता इदाणिं पदुमावदी वा ।

(क) दिष्ट्या प्रकृतिस्थशरीर आर्यपुत्रः ।

(ख) भर्तृदारिके ! रुद्धाः खलु स्मो वयम् । भर्तृदारिके ! साश्रुपाता खल्वार्याया दृष्टिः ।

(ग) एषा खलु मधुकराणामविनयात् काशकुसुमरेणुना पतितेन सोदका मे दृष्टिः ।

(घ) युज्यते ।

(ङ) भोः ! शून्यं खल्विदं प्रमदवनम् । प्रष्टव्यं किञ्चिदस्ति । पृच्छामि भवन्तम् ।

(च) का भवतः प्रिया, तदानीं तत्रभवती वासवदत्ता इदानीं पद्मावती वा ।

राजा—किमिदानीं भवान् महति बहुमानसङ्कटे मां न्यस्यति ।

पद्मावती—(क) हळा! जादिसे सङ्कडे निक्खित्तो अय्यउत्तो ।

वासवदत्ता—(आत्मगतम्) (ख) अहं अ मन्दभाआ ।

विदूषकः—(ग) सेरं सेरं भणादु भवं । एक्का उवरदा, अवरा असण्णिहिदा ।

राजा—वयस्य! न खलु[1] ब्रूयाम् । भवांस्तु मुखरः ।

पद्मावती—(घ) एत्तएण भणिदं अय्यउत्तेण ।

विदूषकः—(ङ) भो! सच्चेण सवामि, कस्स वि ण आचक्खिस्सं । एसा सन्दट्ठा मे जीहा ।

राजा—नोत्सहे सखे! वक्तुम् ।

पद्मावती—(च) अहो इमस्स पुरोभा(अ? इ)दा । एत्तिएण हिअअं[2] ण जाणादि ।

(क) हळा! यादृशे सङ्कटे निक्षिप्त आर्यपुत्रः ।

(ख) अहं च मन्दभागा ।

(ग) स्वैरं स्वैरं भणतु भवान् । एकोपरता, अपरा असन्निहिता ।

(घ) एतावता भणितमार्यपुत्रेण ।

(ङ) भोः! सत्येन शपामि, कस्यापि नाख्यास्यामि । एषा सन्दष्टा मे जिह्वा ।

(च) अहो अस्य पुरोभागिता । एतावता हृदयं न जानाति ।

१. 'लु न खलु ब्रू', २. 'अं जा' ग. पाठः.

विदूषकः —(क) किं ण भणादि मम । अणाचक्खिअ[2] इमादो सिळावट्टआदो ण सक्कं एक्कपदं वि गमिदुं । एसो रुद्धो अत्तभवं ।

राजा — किं बलात्कारेण ।

विदूषकः —(ख) आम, बळक्कारेण ।

राजा —तेन हि पश्यामस्तावत् ।

विदूषकः —(ग) पसीददु पसीददु भवं । वअस्सभावेण साविदो सि, जइ सच्चं ण भणासि ।

राजा — का गतिः । श्रूयताम् ।

पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः ।
वासवदत्ताबद्धं न तु तावन्मे मनो हरति ॥ ४ ॥

वासवदत्ता —(आत्मगतम्) (घ) भोदु भोदु । दिण्णं वेदणं इमस्स परिखेदस्स । अहो अञ्ञादवासं पि एत्थ बहुगुणं सम्पज्जइ ।

(क) किं न भणति मम । अनाख्यायास्माच्छिलापट्टकान्न शक्यमेकपदमपि गन्तुम् । एष रुद्धोऽत्रभवान् ।

(ख) आम, बलात्कारेण ।

(ग) प्रसीदतु प्रसीदतु भवान् । वयस्यभावेन शापितोऽसि, यदि सत्यं न भणसि ।

(घ) भवतु भवतु । दत्तं वेतनमस्य परिखेदस्य । अहो अज्ञातवासोऽप्यत्र बहुगुणः सम्पद्यते ।

---

१. 'कः -जइ अणाचक्खिअं, इ' घ. पाठः । २. 'सि' ख. पाठः.

चेटी—(क) भट्टिदारिए! अदक्खिण्णो खु भट्टा।

पद्मावती—(ख) हळा! मा मा एव्वं। सदक्खिण्णो एव्व अय्यउत्तो, जो इदाणिं वि अय्याए वासवदत्ताए गुणाणि सुमरदि।

वासवदत्ता—(ग) भद्दे! अभिजणस्स सदिसं मन्तिदं।

राजा—उक्तं मया। भवानिदानीं कथयतु। का भवतः प्रिया तदा वासवदत्ता, इदानीं पद्मावती वा।

पद्मावती—(घ) अय्यउत्तो पि वसन्तओ संवुत्तो।

विदूषकः—(ङ) किं मे विप्पळविदेण। उभओ वि तत्तहोदीओ मे बहुमदाओ।

राजा—वैधेय! मामेवं बलाच्छ्रुत्वा किमिदानीं नाभिभाषसे।

(क) भर्तृदारिके! अदाक्षिण्यः खलु भर्ता।

(ख) हला! मा मैवम्। सदाक्षिण्य एवार्यपुत्रः, य इदानीमप्यार्याया वासवदत्ताया गुणान् स्मरति।

(ग) भद्रे! अभिजनस्य सदृशं मन्त्रितम्।

(घ) आर्यपुत्रोऽपि वसन्तकः संवृत्तः।

(ङ) किं मे विप्रलपितेन। उभे अपि तत्रभवत्यौ मे बहुमते।

---

१. 'अदिद', २. 'न्तिदव्वं', ३. 'त्तो व', ४. जा—अ' ख., 'जा—मूर्ख! मा' घ. पाठः.

विदूषकः—(क) किं मं पि बळक्कारेण ।

राजा—अथकिम्, बलात्कारेण ।

विदूषकः—(ख) तेण हि[1] ण सक्कं सोदुं ।

राजा—प्रसीदतु प्रसीदतु महाब्राह्मणः । स्वैरं स्वैरमभिधीयताम् ।

विदूषकः—(ग) इदाणिं सुणादु भवं । तत्तहोदी वासवदत्ता मे बहुमदा । तत्तहोदी पदुमावदी तरुणी दस्सणीआ अकोवणा अणहङ्कारा महुरवाआ सदक्खिञ्ञा । अअं च्च अवरो[2] महन्तो गुणो, सिणिद्धेण भोअणेण मं पच्चुग्गच्छइ वासवदत्ता—कहिंणुखु गदो अय्यवसन्तओ त्ति ।

वासवदत्ता—(घ) भोदु भोदु, वसन्तअ! सुमरेहि दाणिं एदं ।

(क) किं मामपि बलात्कारेण ।

(ख) तेन हि न शक्यं श्रोतुम् ।

(ग) इदानीं शृणोतु भवान् । तत्रभवती वासवदत्ता मे बहुमता । तत्रभवती पद्मावती तरुणी दर्शनीया अकोपना अनहङ्कारा मधुरवाक् सदाक्षिण्या । अयं चापरो महान् गुणः, स्निग्धेन भोजनेन मां प्रत्युद्गच्छति वासवदत्ता—कुत्रनुखलु गत आर्यवसन्तक इति ।

(घ) भवतु भवतु, वसन्तक ! स्मरेदानीमेताम् ।

---

१. 'तेण हि सु', २. 'रो विसेसो । सि' घ. पाठः.

राजा—*भवतु भवतु वसन्तक! सर्वमेतत् कथयिष्ये देव्यै वासवदत्तायै।

विदूषकः—(क) अविहा वासवदत्ता। कहिं वासवदत्ता। चिरा खु उवरदा वासवदत्ता।

राजा—(सविषादम्) एवम्। उपरता वासवदत्ता,

अनेन परिहासेन व्याक्षिप्तं मे मनस्त्वया।
ततो वाणी तथैवेयं पूर्वाभ्यासेन निस्सृता॥ ५॥

पद्मावती—(ख) रमणीओ खु कहाजोओ णिसंसेण विसंवादिओ।

वासवदत्ता—(आत्मगतम्) (ग) भोदु भोदु, विस्सत्थह्मि। अहो पिअं णाम ईदिसं वअणं अप्पच्चक्खं सुणीअदि।

विदूषकः—(घ) धारेदु धारेदु भवं। अणदिक्कमणीओ हि विही। ईदिसं दाणि एदं।

(क) अविहा वासवदत्ता। कुत्र वासवदत्ता। चिरात् खलूपरता वासवदत्ता।

(ख) रमणीयः खलु कथायोगो नृशंसेन विसंवादितः।

(ग) भवतु भवतु, विश्वस्तास्मि। अहो प्रियं नामेदृशं वचनमप्रत्यक्षं श्रूयते।

(घ) धारयतु धारयतु भवान्। अनतिक्रमणीयो हि विधिः। ईदृशमिदानीमेतत्।

* इत आरभ्य 'राजा' इत्यन्तं ख. पुस्तके नास्ति।

राजा — वयस्य! न जानाति भवानवस्थाम् । कुतः,

दुःखं त्यक्तुं बद्धमूलोऽनुरागः
स्मृत्वा स्मृत्वा याति दुःखं नवत्वम् ।
यात्रा त्वेषा यद् विमुच्येह बाष्पं
प्राप्तानृण्या याति बुद्धिः प्रसादम् ॥ ६ ॥

विदूषकः — (क) अस्सुपादकिलिण्णं खु तत्तहोदो मुहं । जाव मुहोदअं आणेमि । (निष्क्रान्तः)

पद्मावती — (ख) अय्ये! बप्फाउळपडन्तरिदं अय्यउत्तस्स मुहं । जाव णिक्कमह्म ।

वासवदत्ता — (ग) एव्वं होदु । अहव चिट्ठ तुवं । उक्कण्ठिदं भत्तारं उज्झिअ अजुत्तं णिग्गमणं । अहं एव्व गमिस्सं ।

चेटी — (घ) सुट्ठु अय्या भणादि । उवसप्पदु दाव भट्टिदारिआ ।

(क) अश्रुपातक्लिन्नं खलु तत्रभवतो मुखम् । यावन्मुखोदकमानयामि ।

(ख) आर्ये! बाष्पाकुलपटान्तरितमार्यपुत्रस्य मुखम् । यावन्निष्क्रामामः ।

(ग) एवं भवतु । अथवा तिष्ठ त्वम् । उत्कण्ठितं भर्तारमुज्झित्वायुक्तं निर्गमनम् । अहमेव गमिष्यामि ।

(घ) सुष्ठ्वार्या भणति । उपसर्पतु तावद् भर्तृदारिका ।

---

१. 'त', २. 'प्फपडळन्त' ख. पाठः. ३. 'वं' क. पाठः. ४. 'मं । अ' ख. पाठः. ५. 'व' क. पाठः.

पद्मावती —(क) किंणुखु[1] पविसामि ।

वासवदत्ता —(ख) हळा! पविसे[2] । (इत्युक्त्वा निष्क्रान्ता)

(प्रविश्य)

विदूषकः — (नलिनीपत्रेण[3] जलं गृहीत्वा) (ग) ऍसा तत्त-होदी पदुमावदी ।

पद्मावती —(घ) अय्य वसन्तअ! किं एदं ।

विदूषकः[4] —(ङ) एदं इदं । इदं एदं ।

पद्मावती —(च) भणादु भणादु अय्यो भणादु ।

विदूषकः —(छ) भोदि! वादणीदेण कासकुसुमरेणुणा अक्खिणिपडिदेण[6] सस्सुपादं खु तत्तहोदो मुहं । ता गह्णदु होदी[7] इदं मुहोदअं ।

(क) किन्नुखलु प्रविशामि ।

(ख) हला! प्रविश ।

(ग) एषा तत्रभवती पद्मावती ।

(घ) आर्य! वसन्तक! किमेतत् ।

(ङ) एतदिदम् । इदमेतत् ।

(च) भणतु भणत्वार्यो भणतु ।

(छ) भवति! वातनीतेन काशकुसुमरेणुनाक्षिनिपतितेन साश्रुपातं खलु तत्रभवतो मुखम् । तद् गृह्णातु भवतीदं मुखोदकम् ।

---

१. 'किं प', २. 'स । (नि', ३. 'त्रे ज' ख. पाठः. ४. 'अइ त' क. घ. पाठः. ५. 'कः—भोदि ! ए', ६. 'ण अस्सुपादकिलिण्णं खु', ७. 'भो' ख. पाठः.

पद्मावती[1] — (क) अहो सदक्खिण्णस्स जणस्स परिजणो वि सदक्खिण्णो एव्व होदि[3]। (उपेत्य) जेदु अय्यउत्तो। इदं मुहोदअं।

राजा — अये पद्मावती। (अपवार्य) वसन्तक! किमिदम्।

विदूषकः — (कर्णे) (ख) एव्वं विअ।

राजा — साधु वसन्तक! साधु। (आचम्य) पद्मावति! आस्यताम्।

पद्मावती — (ग) जं अय्यउत्तो आणवेदि। (उपविशति)

राजा — पद्मावति!

शरच्छशाङ्कगौरेण[4] वाताविद्धेन भामिनि!।
काशपुष्पलवेनेदं साश्रुपातं मुखं मम ॥ ७ ॥

(आत्मगतम्)

इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत्।
कामं[5] धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः ॥ ८ ॥

(क) अहो सदाक्षिण्यस्य जनस्य परिजनोऽपि सदाक्षिण्य एव भवति। जयत्वार्यपुत्रः। इदं मुखोदकम्।

(ख) एवमिव।

(ग) यदार्यपुत्र आज्ञापयति।

---

१. ती — (आत्मगतम्) अ' घ. पाठः. २. 'अ', ३. 'दि। विदूषकः — जेदु भवं। पद्मावती — जेदु अय्यउत्तो। रा' ४. 'रा(ज)च्छ' ख. पाठः. ५. 'मधी' क. पाठः.

विदूषकः —(क) उइदं तत्तहोदो मअधराअस्स अवरह्णकाळे भवन्तं अग्गदो करिअ सुहिज्जणदंसणं। सक्कारो हि णाम सक्कारेण पडिच्छिदो पीदिं उप्पादेदि। ता उट्ठेदु दाव भवं।

राजा —बाढम्[2]। प्रथमः कल्पः। (उत्थाय)

गुणानां वा विशालानां सत्काराणां च नित्यशः।
कर्तारः सुलभा लोके विज्ञातारस्तु[3] दुर्लभाः॥ ९॥

(निष्क्रान्ताः सर्वे)

चतुर्थोऽङ्कः।

(क) उचितं तत्रभवतो मगधराजस्यापराह्णकाले भवन्तमग्रतः कृत्वा सुहृज्जनदर्शनम्। सत्कारो हि नाम सत्कारेण प्रतीष्टः प्रीतिमुत्पादयति। तदुत्तिष्ठतु तावद् भवान्।

---

१. 'कः—इ' क. पाठः. २. 'म्। उ', ३. 'प्र' ख. पाठः.

अथ पञ्चमोऽङ्कः ।

(ततः प्रविशति पद्मिनिका)

पद्मिनिका — (क) महुअरिए ! महुअरिए ! आअच्छ दाव सिग्घं ।

(प्रविश्य)

मधुकरिका — (ख) हळा ! इअह्मि । किं करीअदु ।

पद्मिनिका — (ग) हळा ! किं ण जाणासि तुवं भट्टिदारिआ पदुमावदी सीसे[1]वेदणाए दुक्खाविदे[2] त्ति ।

मधुकरिका — (घ) हद्धि ।

पद्मिनिका — (ङ) हळा ! गच्छ सिग्घं, अय्यं आवन्तिअं सद्दावेहि । केवळं भट्टिदारिआए सीसवेदणं एव्व णिवेदेहि । तदो सअं एव्व आगमिस्सदि ।

(क) मधुकरिके ! मधुकरिके ! आगच्छ तावच्छीघ्रम् ।

(ख) हला ! इयमस्मि । किं क्रियताम् ।

(ग) हला ! किं न जानासि त्वं भर्तृदारिका पद्मावती शीर्षवेदनया दुःखितेति ।

(घ) हा धिक् ।

(ङ) हला ! गच्छ शीघ्रम्, आर्यामावन्तिकां शब्दय । केवलं भर्तृदारिकायाः शीर्षवेदनामेव निवेदय । ततः स्वयमेवागमिष्यति ।

१. 'का--किं', २. 'स्स', ३. 'दा' ख. पाठः. ४. 'य्य' क. पाठः, ५. 'अ' ख. पाठः.

मधुकरिका—(क) हळा ! किं सा करिस्सदि ।

पद्मिनिका—(ख) सा हु दाणिं[1] महुराहि कहाहि भट्टिदारिआए सीसवेदणं विणोदेदि ।

मधुकरिका—(ग) जुज्जइ । कहिं सअणीयं रइदं भट्टिदारिआए ।

पद्मिनिका—(घ) समुद्दगिहके किळ सेज्जात्थिण्णा[2] । गच्छ दाणि तुवं । अहं वि भट्टिणो णिवेदणत्थं अय्यवसन्तअं अण्णेसामि ।

मधुकरिका—(ङ) एव्वं होदु । (निष्क्रान्ता)

पद्मिनिका—(च) कहिं दाणिं अय्यवसन्तअं पेक्खामि ।

(क) हला ! किं सा करिष्यति ।

(ख) सा खल्विदानीं मधुराभिः कथाभिः भर्तृदारिकायाः शीर्षवेदनां विनोदयति ।

(ग) युज्यते । कुत्र शयनीयं रचितं भर्तृदारिकायाः ।

(घ) समुद्रगृहके किल शय्यास्तीर्णा । गच्छेदानीं त्वम् । अहमपि भर्त्रे निवेदनार्थमार्यवसन्तकमन्वेषे ।

(ङ) एवं भवतु ।

(च) कुत्रेदानीमार्यवसन्तकं प्रेक्षे ।

---

१. 'णि', २. 'य्यात्तिण्णा' क. पाठः.

(ततः प्रविशति विदूषकः)

विदूषकः — (क) अज्ज[1] खु देवीविओआविहुरहिअअस्स तत्तहोदो वच्छराअस्स पदुमावदीपाणिग्गहणसमीरिअ[2]स्स अच्चन्तसुहावहे[3] मङ्गळोसवे मदर्ण[4]ग्गिदाहो अहिअदरं वड्ढइ[5] । (पद्मिनिकां विलोक्य) अयि पदुमिणिआ । पदुमिणिए ! किं इह वत्तदि[6] ।

पद्मिनिका — (ख) अय्य ! वसन्तअ ! किं ण जाणासि तुवं भट्टिदारिआ पदुमावदी सीसवेदणाए दुःखाविदत्ति[7] ।

विदूषकः — (ग) भोदि ! सच्चं, ण जाणामि[8] ।

पद्मिनिका — (घ) तेण हि[9] भट्टिणो णिवेदेहि[10] णं । जाव अहं वि सीसाणुळेवणं तुवारेमि ।

(क) अद्य खलु देवीवियोगविधुरस्य तत्रभवतो वत्सराजस्य पद्मावतीपाणिग्रहणसमीरितस्यात्यन्तसुखावहे मङ्गलोत्सवे मदनाग्निदाहोऽधिकतरं वर्धते । अयि पद्मिनिका । पद्मिनिके ! किमिह वर्तते ।

(ख) आर्य ! वसन्तक ! किं न जानासि त्वं भर्तृदारिका पद्मावती शीर्षवेदनया दुःखितेति ।

(ग) भवति ! सत्यं, न जानामि ।

(घ) तेन हि भर्त्रे निवेदयैनाम् । यावदहमपि शीर्षानुलेपनं त्वरयामि ।

---

१. 'ज्ज वि हु देवीविओअविहुरस्स' घ. पाठः. २. 'अमाणस्स' घ. पाठः. ३. 'हे वमङ्गळमोणममण' क. पाठः. ४. 'णदो', ५. 'दइ । (विलोक्य) पदुमाणिए !' ख. पाठः. ६. किं एदं ।' घ. पाठः. ७. 'दावि ।' ख. पाठः. ८. 'दे' क. पाठः. ९. 'हि सिग्घं भ', १०. 'हि । जा' ख. पाठः.

विदूषकः — (क) कहिं सअणीअं रइदं पदुमावदीए ।

पद्मिनिका — (ख) समुद्दगिहके किळ सेज्जात्थिण्णा[1] ।

विदूषकः — (ग) गच्छदु भोदी । जाव अहं वि तत्त-होदो णिवेदेइस्सं[2] ।

(निष्क्रान्तौ)

(प्रवेशकः)

(ततः प्रविशति राजा)

राजा —

श्लाघ्यामवन्तिनृपतेः सदृशीं तनूजां
कालक्रमेण पुनरागतदारभारः ।
लावाणके हुतवहेन हृताङ्गयष्टिं
तां पद्मिनीं हिमहतामिव चिन्तयामि ॥ १ ॥

(प्रविश्य)

विदूषकः — (घ) तुवरदु तुवरदु दाव भवं ।

***राजा** — किमर्थम् ।

(क) कुत्र शयनीयं रचितं पद्मावत्याः ।

(ख) समुद्रगृहके किल शय्यास्तीर्णा ।

(ग) गच्छतु भवती । यावदहमपि तत्रभवते निवेदयिष्यामि ।

(घ) त्वरतां त्वरतां तावद् भवान् ।

---

१. 'सय्यात्तिण्णा' क. पाठः. २. 'देमि ।' घ. पाठः.

---

* 'राजा' इत्यादि 'दु' इत्यन्तं क. पुस्तके त्रुटितम् ।

विदूषकः—(क) तत्तहोदी पदुमावदी §सीसवेदणाए दुक्खाविदा।

राजा—कैवमाह।

विदूषकः—(ख) पदुमिणिआए कहिदं।

राजा—भोः! कष्टं,

रूपश्रिया समुदितां गुणतश्च युक्तां
लब्ध्वा प्रियां मम तु मन्द इवाद्य शोकः।
‡पूर्वाभिघातसरुजोऽप्यनुभूतदुःखः
पद्मावतीमपि तथैव समर्थयामि॥ २॥

अथ कस्मिन् प्रदेशे वर्तते पद्मावती।

विदूषकः—(ग) समुद्दगिहके किळ सेज्जात्थिण्णा[1]।

राजा—तेन हि तस्य मार्गमादेशय।

विदूषकः—(घ) एदु एदु भवं।

(क) तत्रभवती पद्मावती शीर्षवेदनया दुःखिता।
(ख) पद्मिनिकया कथितम्।
(ग) समुद्रगृहके किल शय्यास्तीर्णा।
(घ) एत्वेतु भवान्।

---

१. 'त्थि' ख. पाठः.

---

§ 'सीदनदणाए' (?) इति ख. पुस्तके दृश्यते। ‡ पूर्वाभिघातसरुजोऽपि अनुवर्तमानपूर्वाभिघातपीडयापीत्यर्थः।

(उभौ परिक्रामतः)

विदूषकः — (क) इदं समुद्दगिहकं । पविसदु[१] भवं ।

राजा — पूर्वं प्रविश ।

विदूषकः — (ख) भो! तह । (प्रविश्य) अविहा चिट्ठदु चिट्ठदु दाव भवं ।

राजा — किमर्थम् ।

विदूषकः — (ग) एसो खु दीवप्पभा[२]वसूइदरूवो वसुधातळे परिवत्तमाणो अअं काओदरो ।

राजा[३] — (प्रविश्यावलोक्य सस्मितम्) अहो सर्पव्यक्तिर्वैधेयस्य।[४]

[५]ऋज्वायतां हि मुखतोरणलोलमालां
भ्रष्टां क्षितौ त्वमवगच्छसि मूर्ख! सर्पम् ।
मन्दानिलेन निशि या परिवर्तमाना
किञ्चित् करोति भुजगस्य विचेष्टितानि ॥ ३ ॥

विदूषकः — (निरूप्य) (घ) सुट्ठु भवं भणादि । ण हु

(क) इदं समुद्रगृहकम् । प्रविशतु भवान् ।

(ख) भोः! तथा । अविहा तिष्ठतु तिष्ठतु तावद् भवान् ।

(ग) एष खलु दीपप्रभावसूचितरूपो वसुधातले परिवर्तमानोऽयं काकोदरः ।

(घ) सुष्ठु भवान् भणति । न खल्वयं काकोदरः । तत्रभवती पद्मावती-

---

१. 'दु दाव भ', २. 'भासू' ख. पाठः. ३. 'जा—अ' क. पाठः. ४. 'स्य । कुतः, ऋ' ख. घ. पाठः. ५. 'च' क. पाठः.

अअं काओअरो । (प्रविश्यावलोक्य) तत्तहोदी पदुमावदी इह आअच्छिअ णिग्गदा भवे ।

राजा — वयस्य! अनागतया भवितव्यम् ।

विदूषकः — (क) कहं भवं जाणादि ।

राजा — किमत्र ज्ञेयम् । पश्य,

शय्या नावनता तथास्तृतसमा न व्याकुलप्रच्छदा
न क्लिष्टं हि [\$]शिरोपधानममलं शीर्षाभिघातौषधैः ।
रोगे दृष्टिविलोभनं जनयितुं शोभा न काचित् कृता
प्राणी प्राप्य रुजां पुनर्न शयनं शीघ्रं स्वयं मुञ्चति ॥ ४ ॥

विदूषकः — (ख) तेण हि इमस्सिं [2]सेय्याए मुहुत्तअं [3]उवविसिअ तत्तहोदिं पडिवाळेदु भवं ।

राजा — बाढम् । (उपविश्य) वयस्य! निद्रा मां बाधते । कथ्यतां काचित् कथा ।

विदूषकः — (ग) अहं कहइस्सं । होन्ति करे[4]दुं अत्तभवं ।

हागत्य निर्गता भवेत् ।

(क) कथं भवान् जानाति ।

(ख) तेन ह्यस्यां शय्यायां मुहूर्तकमुपविश्य तत्रभवतीं प्रतिपालयतु भवान् ।

(ग) अहं कथयिष्यामि । हुङ्कृतिं करोत्वत्रभवान् ।

---

१. 'जं', २. 'सेज्जाए' घ. पाठः. ३. 'वनिवि', ४. 'दु दाव भ' ख. पाठः.

\$ शिरस्य शीर्षस्य उपधानं शिरोपधानं । "शिरोवाची शिरोऽदन्तो रजोवाची रजस्तथा । विचकर्त शिरान् द्रौणिः, इति कण्ठभूषणालङ्कार उक्तम्" इत्यमरटीकासर्वस्वम् ।

राजा — बाढम् ।

विदूषकः — (क) अत्थि णअरी उज्जइणी णाम । त-
[२]हिं अहिअरम[३]णीआणि §उदअह्णाणाणि वत्तन्ति किळ ।

राजा — कथमुज्जयिनी नाम ।

विदूषकः — (ख) जइ अणभिप्पेदा एसा कहा, अण्णं कहइस्सं ।

राजा — वयस्य! न खलु नाभिप्रेतैषा कथा। किन्तु,

स्मराम्यवन्त्याधिपतेः[¶] सुतायाः
प्रस्थानकाले स्वजनं स्मरन्त्याः ।
बाष्पं प्रवृ[४]द्धं नयनान्तलग्नं
स्नेहान्ममैवोरसि पातयन्त्याः ॥ ५ ॥

अपि च,

बहुशोऽप्युपदेशेषु यया मामीक्षमाणया ।
हस्तेन स्रस्तकोणेन कृतमाकाशवादितम् ॥ ६ ॥

(क) अस्ति नगर्युज्जयिनी नाम । तत्राधिकरमणीयान्युदकस्नानानि वर्तन्ते किल ।

(ख) यद्यनभिप्रेतैषा कथा, अन्यां कथयिष्यामि ।

१.'छन्दतः' ख. पाठः. २. 'हिं किळ अ' क. पाठः. ३. 'णिज्जाणि', ४. 'त्तं' ख. पाठः.

---

§ क. ग्रन्थे 'ह्णा' इति वर्णे हकारो निरस्त इव दृश्यते । अतः 'उदअणाणाणि' इति पाक्षिकपाठसंभावनास्ति । तदा च 'उदयज्ञानानि' इतिच्छाया बोद्धव्या । ¶ इह अधि-पतिशब्दे आङः प्रश्लेषोऽपूर्वः ।

विदूषकः—(क) भोदु, अण्णं कहइस्सं । अत्थि णअरं बह्मदत्तं णाम । तहिं किळ राआ कंपिळ्ळो[1] णाम ।

राजा—किमिति किमिति ।

विदूषकः—(पुनस्तदेव पठति)

राजा—मूर्ख! राजा ब्रह्मदत्तः, नगरं काम्पिल्यमित्यभिधीयताम् ।

विदूषकः—(ख) किं राआ बह्मदत्तो, णअरं कंपिळ्ळं ।

राजा—एवमेतत् ।

विदूषकः—(ग) तेण[2] हि मुहुत्तअं पडिवाळेदु भवं[3], जाव ओट्ठगअं करिस्सं । राआ बह्मदत्तो, णअरं कंपिळ्ळं । (इति बहुशस्तदेव पठित्वा)[4] इदाणिं सुणादु भवं । अयि सुत्तो अत्तभवं[5] । अदिसीदळा इअं वेळा । अत्तणो पावरअं गह्णिअ आअमिस्सं । (निष्क्रान्तः)

(क) भवतु, अन्यां कथयिष्यामि । अस्ति नगरं ब्रह्मदत्तं नाम । तत्र किल राजा काम्पिल्यो नाम ।

(ख) किं राजा ब्रह्मदत्तः, नगरं काम्पिल्यम् ।

(ग) तेन हि मुहूर्तकं प्रतिपालयतु भवान्, यावदोष्ठगतं करिष्यामि । राजा ब्रह्मदत्तः, नगरं काम्पिल्यम् । इदानीं शृणोतु भवान् । अयि सुप्तोऽत्रभवान् । अतिशीतलेयं वेला । आत्मनः प्रावरकं गृहीत्वागमिष्यामि ।

---

१. 'वि' क. पाठः. २. 'जइ एव्वं मु' घ. पाठः. ३. 'वं ण जा', ४. 'शः पठति)' क. पाठः. ५ 'वं । इं अ' ख. पाठः.

(ततः प्रविशति वासवदत्ता आवन्तिकावेषेण, चेटी च)

चेटी — (क) एदु एदु अय्या । दिढं खु भट्टिदारिआ[1] सीसवेदणाए दुक्खाविदा ।

वासवदत्ता[2] — (ख) हद्धि, कहिं सअणीअं रइदं पदुमावदीए ।

चेटी — (ग) समुद्दगिहके किळ सेज्जात्थिण्णा[4] ।

वासवदत्ता — (घ) तेण हि अग्गदो याहि ।

(उभे परिक्रामतः)

चेटी — (ङ) इदं समुद्दगिहकं । पविसदु अय्या । जाव अहं वि सीसाणुळेवणं[6] तुवारेमि । (निष्क्रान्ता)

वासवदत्ता — (च) अहो अकरुणा खु इस्सरा मे[7] । विरहपय्युस्सुअस्स अय्यउत्तस्स विस्समत्थाणभूदा इअं पि

(क) एत्वेत्वार्या । दृढं खलु भर्तृदारिका शीर्षवेदनया दुःखिता ।

(ख) कुत्र शयनीयं रचितं पद्मावत्याः ।

(ग) समुद्रगृहके किल शय्यास्तीर्णा ।

(घ) तेन ह्यग्रतो याहि ।

(ङ) इदं समुद्रगृहकम् । प्रविशत्वार्या । यावदहमपि शीर्षानुलेपनं त्वरयामि ।

(च) अहो अकरुणाः खल्वीश्वरा मे । विरहपर्युत्सुकस्यार्यपुत्रस्य विश्रम-

---

१. 'त्ता चे' ख. पाठः. २. 'आ पदुमावदी सी' ख. पाठः. ३. 'त्ता क' क. घ. पाठः. ४. 'सय्यात्तिण्णा' क. पाठः. ५. 'हि । चे' ख. पाठः. ६ 'सिस्साणु' ख. पाठः. ७. 'मम वि' ख. पाठः.

णाम पदुमावदी अस्सत्था जादा । जाव पविसामि । (प्रविश्यावलोक्य) अहो परिजणस्स पमादो । अस्सत्थं पदुमावदिं केवळं दीवसहाअं करिअ परित्तिजदि । इअं पदुमावदी ओ-सुत्ता । जाव उवविसामि । अहवा अञ्ञासणपरिग्गहेण अप्पो विअ सिणेहो पडिभादि । ता इमस्सिं सय्याए उव-विसामि । (उपविश्य) किंणुहु एदाए सह उवविसन्तीए अज्ज पह्ळादिदं[2] विअ मे हिअअं । दिट्ठिआ अविच्छिण्णसुह-णिस्सासा । णिव्वुत्तरोआए होदव्वं । अहव एअदेससंविभा-अदाए सअणअिस्स सूएदि मं आळिङ्गेहि त्ति । जाव सइस्सं । (शयनं नाटयति)

राजा — (स्वप्नायते) हा वासवदत्ते!

वासवदत्ता — (सहसोत्थाय) (क) हं अय्यउत्तो, ण हु[3] पदुमावदी । किंणुखु दिट्ठह्मि । महन्तो खु अय्यजोअन्धरा-

---

स्थानभूतेयमपि नाम पद्मावत्यस्वस्था जाता । यावत् प्रविशामि । अहो परि-जनस्य प्रमादः । अस्वस्थां पद्मावतीं केवलं दीपसहायां कृत्वा परित्यजति । इयं पद्मावत्यवसुप्ता । यावदुपविशामि । अथवान्यासनपरिग्रहेणाल्प इव स्नेहः प्रतिभाति । तदस्यां शय्यायामुपविशामि । किंनुखल्वेतया सहोपविशन्त्या अद्य प्रह्लादितामिव मे हृदयम् । दिष्ट्याविच्छिन्नसुखनिःश्वासा । निवृ-त्तरोगया भवितव्यम् । अथवैकदेशसंविभागतया शयनीयस्य सूचयति मामा-लिङ्गेति । यावच्छयिष्ये ।

(क) हम् आर्यपुत्रः, न खलु पद्मावती । किन्नुखलु दृष्टास्मि । महान्

---

१. 'सेज्जाये मुहुत्तं उ' घ. पाठः. २. 'ह्लादि' क. ग. पाठः. ३. 'खु' ख. पाठः.

अणस्स पडिण्णाहारो मम दंसणेण णिप्फळो संवुत्तो ।

राजा — हा अवन्तिराजपुत्रि!

[1]वासवदत्ता — (क) दिट्ठिआ सिविणाअदि खु अय्यउत्तो । ण[2] एत्थ [3]कोच्चि जणो । जाव मुहुत्तअं चिट्ठिअ दिट्ठिं हिअअं च[4] तोसेमि ।

राजा — हा प्रिये! हा प्रियशिष्ये! देहि मे प्रतिवचनम् ।

[5]वासवदत्ता — (ख) आळवामि भट्टा! आळवामि ।

राजा — किं कुपितासि ।

वासवदत्ता — (ग) णहि णहि, दुक्खिदह्मि ।

राजा — [6]यद्यकुपिता, किमर्थं नालङ्कृता[7]सि ।

वासवदत्ता — (घ) इदो वरं किं[8] ।

खल्वार्ययौगन्धरायणस्य प्रतिज्ञाभारो मम दर्शनेन निष्फलः संवृत्तः ।

(क) दिष्ट्या स्वप्नायते खल्वार्यपुत्रः । नात्र कश्चिज्जनः । यावन्मुहूर्तकं स्थित्वा दृष्टिं हृदयं च तोषयामि ।

(ख) आलपामि भर्तः! आलपामि ।

(ग) नहि नहि, दुःखितास्मि ।

(घ) इतः परं किम् ।

---

१. 'आवन्तिका—' क. पाठः. २. 'ण खु ए' ख. पाठः. ३. 'को ज' क. पाठः. ४. 'अ' ख पाठः. ५. 'आवन्तिका—' क. पाठः. ६. 'अद्यापि कु' ख. पाठः. ७. 'ता ।' क. पाठः. ८. 'किं पि ।' घ. पाठः.

राजा—किं विरहि[1]कां स्मरसि ।

वासवदत्ता[2]—(सरोषम्) (क) आ अवेहि, इहावि विरहिआ ।

राजा—तेन हि विर(चि?हि)का[3]र्थं भवतीं प्रसादयामि। (हस्तौ प्रसारयति)

वासवदत्ता—(ख) चिरं ठिदह्मि । को वि मं पेक्खे । तो[4] गमिस्सं । अहव, सय्यावळम्बिअं अय्यउत्तस्स हत्थं सअणीए आरोविअ गमिस्सं । (तथा कृत्वा निष्क्रान्ता)

राजा—(सहसोत्थाय) वासवदत्ते! तिष्ठ तिष्ठ । हा धिक् ।

निष्क्रामन् सम्भ्रमेणाहं[5] द्वारपक्षेण ताडितः ।
ततो व्यक्तं[6] न जानामि भूतार्थोऽयं मनोरथः ॥ ७ ॥

(प्रविश्य)

विदूषकः—(ग) अइ पडिबुद्धो अत्तभवं ।

(क) आ अपेहि, इहापि विरहिका ।

(ख) चिरं स्थितास्मि । कोऽपि मां पश्येत् । तद् गमिष्यामि । अथवा, शय्यावलम्बितमार्यपुत्रस्य हस्तं शयनीय आरोप्य गमिष्यामि ।

(ग) अयि प्रतिबुद्धोऽत्रभवान् ।

---

१. 'चितां स्म', क. पाठः, 'चिकां स्म' घ. पाठः. २. 'त्ता—अ' ख. पाठः. ३. 'तां भ' क. पाठः. ४. 'ण जुत्तं चिट्ठिस्सं । अहव सज्जाव' घ. पाठः. ५. 'प-र्ज्वार', ६. 'ति भाता' क. पाठः.

राजा—वयस्य! प्रियमावेदये, *धरते[1] खलु वासवदत्ता।

विदूषकः—(क) अविहा[2] वासवदत्ता। कहिं वासवदत्ता। चिरा खु उवरदा वासवदत्ता।

राजा—वयस्य[3]! मा मैवं,

शय्यायामवसुप्तं मां बोधयित्वा सखे! गता।
दग्धेति ब्रुवता पूर्वं वञ्चितोऽस्मि रुमण्वता॥ ८॥

विदूषकः[4]—(ख) अविहा असम्भावणीअं एदं ण। आ उदअह्णाणसङ्कित्तणेण तत्तहोदिं चिन्तअन्तेण सा सिविणे दिट्ठा भवे।

राजा—

यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्।
अथायं विभ्रमो वा स्याद् विभ्रमो ह्यस्तु मे चिरम्॥ ९॥

(क) अविहा वासवदत्ता। कुत्र वासवदत्ता। चिरात् खलूपरता वासवदत्ता।

(ख) अविहा असम्भावनीयमेतद् न। आ उदकस्नानसङ्कीर्तनेन तत्रभवतीं चिन्तयता सा स्वप्ने दृष्टा भवेत्।

---

१. 'ते वा' क. पाठः. २. 'आ वासवदत्ता। राजा' ख. पाठः. ३. 'स्य! श क. पाठः. ४. 'कः—मा दाणि भवं अदिमत्तं सन्तप्पिदुं। उ' घ., 'कः—आ उदअण्णाण' ख. पाठः.

---

* ध्रियत इत्यर्थः।

विदूषकः[1]**—**(क) मा दाणि भवं [2]अत्ताणं ओहसिअं कादुं । किन्तु इमस्सिं राअउळे अवन्तिसुन्दरी णाम जक्खिणी पडिवसदि । सा तुए दिट्ठा[3] भवे ।

राजा—न न,

स्वप्नस्यान्ते विबुद्धेन नेत्रविप्रोषिताञ्जनम् ।
चारित्रमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम् ॥ १० ॥

अपि च वयस्य! पश्य पश्य,

योऽयं सन्त्रस्तया देव्या तया बाहुर्निपीडितः ।
स्वप्नेऽप्युत्पन्नसंस्पर्शो रोमहर्षं न मुञ्चति[4] ॥ ११ ॥

विदूषकः—(ख) मा दाणि भवं अणत्थं चिन्तिअ । एदु एदु भवं । चउस्साळं पविसामो ।

(प्रविश्य)

काञ्चुकीयः—जयत्वार्यपुत्रः । अस्माकं महाराजो दर्शको भवन्तमाह—एष खलु भवतोऽमात्यो रुमण्वान् महता बलसमुदयेनोपयातः खल्वा[5]रुणिमभिघातयितुम्[6] ।

(क) मेदानीं भवानात्मानमवहसितं कर्तुम् । किन्त्वस्मिन् राजकुलेऽवन्तिसुन्दरी नाम यक्षिणी प्रतिवसति । सा त्वया दृष्टा भवेत् ।

(ख) मेदानीं भवाननर्थं चिन्तयित्वा । एत्वेतु भवान् । चतुःशालं प्रविशावः ।

१. 'कः—भो वअस्स ! एदस्सिं णअरे अवन्ति' घ. पाठः. २. 'अणत्थं चिन्तिअ दूं' ख. पाठः. ३. 'ट्ठा । रा' ख. घ. पाठः. ४. 'ति । प्रवि' ख. पाठः. ५. 'रि', ६. 'म् । ह' क. पाठः.

तथा हस्त्यश्वरथपदातीनि मामकानि विजयाङ्गानि सन्नद्धानि। तदुत्तिष्ठतु भवान्[1]। अपि च,

भिन्नास्ते रिपवो भवद्गुणरताः पौराः समाश्वासिताः
पार्ष्णी चापि‡ भवे[2]त्प्रयाणसमये तस्या विधानं कृतम्।
यद्यत् साध्यमरिप्रमाथजननं तत्तन्मयानुष्ठितं
तीर्णा चापि बलैर्नदी त्रिपथगा वत्साश्च हस्ते तव ॥ १२ ॥

राजा[3]— (उत्थाय) बाढम्। अयमिदानीम्,

उपेत्य नागेन्द्रतुरङ्ग[4]तीर्णे
तमारुणिं दारुणकर्मदक्षम्।
विकीर्णबाणोग्रतरङ्गभङ्गे
महार्णवाभे युधि* नाशयामि ॥ १३ ॥

(निष्क्रान्ताः सर्वे)

पञ्चमोऽङ्कः।

---

१. 'न् भि', २. 'वान् प्र', ३. जा—अ' ख. पाठः. 'जा—बा' क. पाठः. ४. 'की' ख. ग. पाठः.

---

‡ 'चापि' इत्यस्य स्थाने 'यापि' इत्येव पाठः स्यात्। उत्थास्यतः पार्ष्णिशुद्धिरपेक्षितानेन वाक्येन प्रतिपाद्यते। स्त्रीलिङ्गोऽपि पार्ष्णिशब्दोऽस्ति। ततः 'कृदिकारादक्तिनः' इति ङीपि पार्ष्णीशब्दोऽपि भवति। 'पार्ष्णिर्यापि' इत्येव वा पाठो भवेत्।
* अस्मादेव प्रयोगाद् युच्छब्दः पुंस्यपि द्रष्टव्यः। संयच्छब्दवत्। संयच्छब्दव्याख्यायां हि अमरटीकासर्वस्वकार आह — "'रवेजि संयत्यतुलाङ्गगौरवे' इति दण्डिना पुमान् संयत् प्रयुक्तः" इति।

अथ षष्ठोऽङ्कः ।

(ततः प्रविशति काञ्चुकीयः)

काञ्चुकीयः — क इह भोः ! [1]रत्नतोरणद्वारमशून्यं कुरुते ।

(प्रविश्य)

प्रतीहारी — (क) अय्य ! अहं विजआ । किं करीअदु ।

काञ्चुकीयः[2] — भवति ! निवेद्यतां निवेद्यतां वत्सराज्य[3]लोभप्रवृद्धोदयायोदयनाय — एष खलु महासेनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयः प्राप्तः, तत्रभवत्या चाङ्गारवत्या प्रेषिता[4]र्यौ वसुन्धरा नाम वासवदत्ताधात्री च प्रतीहारमुपस्थि[5]तौविति ।

प्रतीहारी — (ख) अय्य ! अदेसकालो पडिहारस्स ।

काञ्चुकीयः — कथमदेशकालो नाम ।

प्रतीहारी — (ग) सुणादु अय्यो । अज्ज भट्टि[6]णो (सु?स)य्याँ[7]महाप्पासादगदेण केण वि वीणा वादिदा । तं च

(क) आर्ये ! अहं विजया । किं क्रियताम् ।

(ख) आर्य ! अदेशकालः प्रतिहारस्य ।

(ग) शृणोत्वार्यः । अद्य भर्तुः शय्यामहाप्रासादगतेन केनापि वीणा

---

१. 'काञ्चनतो' ख. घ. पाठः. २. 'यः— विजये ! नि' घ. पाठः. ३. 'लो', ४. 'र्ये' ख. पाठः. ५. 'ता इ', ६. 'णा' क. पाठः. ७. 'आमुण्णपा' ख. पाठः.

सुणिअं भट्टिणा भणिअं — घोसवदीए सद्दो विअ सुणीअदि त्ति ।

काञ्चुकीयः — ततस्ततः ।

प्रतीहारी — (क) तदो तहिं गच्छिअ पुच्छिदो — कुदो इमाए वीणाए आगमो त्ति । तेण भणिअं — अह्मेहिं णम्मदातीरे कोय्यगुम्मलग्गा दिट्ठा । जइ प्पओअणं इमाए उवणीअदु भट्टिणो त्ति । तं च उवणीदं अङ्के करिअ मोहं गदो भट्टा । तदो मोहप्पच्चागदेण बप्फपय्याउळेण मुहेण* भट्टिणा भणिअं — दिट्ठासि घोसवदि ! सा हु ण दिस्सदि त्ति । अय्य ! ईदिसो अणवसरो । कहं णिवेदेमि ।

वादिता । तां च श्रुत्वा भर्त्रा भणितं — घोषवत्याः शब्द इव श्रूयते इति ।

(क) ततस्तत्र गत्वा पृष्टः — कुतोऽस्या वीणाया आगम इति । तेन भणितम् — अस्माभिर्नर्मदातीरे (कोय्य?)गुल्मलग्ना दृष्टा । यदि प्रयोजनमनया, उपनीयतां भर्त्रेति । तां चोपनीतामङ्के कृत्वा मोहं गतो भर्ता । ततो मोहप्रत्यागतेन बाष्पपर्याकुलेन मुखेन भर्त्रा भणितं — दृष्टासि घोषवति ! सा खलु न दृश्यत इति । आर्ये ! ईदृशोऽनवसरः । कथं निवेदयामि ।

---

१. 'अ भणि' ख. पाठः. २. 'ए वीणाए उ' घ. पाठः. ३. 'णो' ख. पाठः. ४. 'रणिदं' क. पाठः. ५. 'दि' घ. पाठः.

---

* 'ळेणमुच्छूहेण' । इति ख. ग्रन्थे पठ्यते । तच्च 'ळोच्छूणमुहेण' इति पठनीयं भाति । बाष्पपर्याकुलोच्छूनमुखेन' इति च संस्कृतं समग्रपदस्य बोद्धव्यम् ।

काञ्चुकीयः— भवति ! निवेद्यता[1]म् । इदमपि तदाश्रयमेव ।

प्रतीहारी— (क) अय्य ! इअं णिवेदे[2]मि । एसो भट्टा (सु ? स)य्यामहप्पासादादो ओदरइ । ता इह एव्व णिवेदइस्सं ।

काञ्चुकीयः— भवति ! तथा ।

(उभौ निष्क्रान्तौ)

मिश्रविष्कम्भकः ।

(ततः प्रविशति राजा विदूषकश्च)

राजा—

श्रुतिसु[3]खनिनदे ! कथं नु देव्याः
स्तनयुगले जघनस्थले च सुप्ता ।
विहगगणरजोविकीर्णदण्डा
प्रतिभयमध्युषितास्यरण्यवासम् ॥ १ ॥

अपि च, अस्निग्धासि घोषवति ! या तपस्विन्या न स्मरसि,

श्रोणीसमुद्वहनपार्श्वनिपीडितानि
स्वे[4]दस्तनान्तरसुखान्युपगूहितानि ।

(क) आर्य ! इयं निवेदयामि । एष भर्ता शय्यामहाप्रासादादवतरति । तदिहैव निवेदयिष्यामि ।

---

१. 'तां निवेद्यताम् । इ' घ. पाठः. २. 'मि । (निष्क्रान्ता) मिश्रवि' ख. पाठः. ३. 'रखमधुरो' (?) ख. पाठः. ४. 'खे' क. घ. पाठः.

उद्दिश्य मां च विरहे परिदेवितानि
वाद्यान्तरेषु कथितानि च सस्मितानि ॥ २ ॥

विदूषकः—(क) अळं दाणि भवं[1] अदिमत्तं सन्तप्पिअ[2] ।

राजा—वयस्य! मा मैवं,

चिरप्रसुप्तः कामो मे वीणया प्रतिबोधितः ।
तां तु देवीं न पश्यामि यस्या घोषवती प्रिया ॥ ३ ॥

वसन्तक! शिल्पिजनसकाशान्नवयोगां घोषवतीं कृत्वा शीघ्रमानय ।

विदूषकः—(ख) जं भवं आणवेदि[3] । (वीणां गृहीत्वा निष्क्रान्तः)

(प्रविश्य)

प्रतीहारी—(ग) जेदु भट्टा । एसो खु महासेणस्स सआसादो रब्भसगोत्तो कञ्चुईओ[4] देवीए[5] अङ्गारवदीए पेसिदा अय्या वसुन्धरा णाम वासवदत्ताधत्ती अ पडिहारं उवट्ठिदा ।

(क) अलमिदानीं भवानतिमात्रं सन्तप्य ।

(ख) यद् भवानाज्ञापयति ।

(ग) जयतु भर्ता । एष खलु महासेनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयो देव्याङ्गारवत्या प्रेषितार्या वसुन्धरा नाम वासवदत्ताधात्री च प्रतिहारमुपस्थितौ ।

---

१. 'वं । रा' ख. पाठः. २. 'दुं ।' घ. पाठः. ३. 'दि । नि' ख. पाठः. ४. 'ई दे' क. पाठः. ५. 'ए पे' ख. पाठः.

राजा — तेन हि पद्मावती तावदाहूयताम् ।

प्रतीहारी — (क) जं भट्टा आणवेदि । (निष्क्रान्ता)

राजा — किन्नुखलु शीघ्रमिदानीमयं वृत्तान्तो महासेनेन विदितः ।

(ततः प्रविशति पद्मावती प्रतीहारी च)

प्रतीहारी — (ख) एदु एदु भट्टिदारिआ ।

पद्मावती — (ग) जेदु अय्यउत्तो ।

राजा — पद्मावति ! किं श्रुतं महासेनस्य सकाशाद् रैभ्यसगोत्रः काञ्चुकीयः प्राप्तस्तत्रभवत्या चाङ्गारवत्या प्रेषितार्या वसुन्धरा नाम वासवदत्ताधात्री च प्रतिहारमुपस्थिताविति ।

पद्मावती — (घ) अय्यउत्त ! पिअं मे ञादिकुळस्स कुसळवुत्तन्तं सोदुं ।

राजा — अनुरूपमेतद् भवत्याभिहितं — वासवदत्तास्वजनो मे स्वजन इति । पद्मावति ! आस्यताम् । किमिदानीं नास्यते ।

(क) यद् भर्ताज्ञापयति ।

(ख) एत्वेतु भर्तृदारिका ।

(ग) जयत्वार्यपुत्रः ।

(घ) आर्यपुत्र ! प्रियं मे ज्ञातिकुलस्य कुशलवृत्तान्तं श्रोतुम् ।

---

१. 'ञा' क. पाठः, 'णादि' ख. पाठः. २. 'काञ्चुकीयः — अ' क. पाठः.

पद्मावती — (क) अय्यउत्त ! किं मए सह उवविट्ठो एदं जणं पेक्खिस्सदि ।

राजा — कोऽत्र दोषः ।

पद्मावती — (ख) अय्यउत्तस्स अवरो परिग्गहो त्ति उदासीणं विअ होदि ।

राजा — कलत्रदर्शनार्हं जनं कलत्रदर्शनात् परिहरतीति बहुदोषमुत्पादयति । तस्मादास्यताम् ।

पद्मावती — (ग) जं अय्यउत्तो आणवेदि । (उपविश्य) अय्यउत्त ! तादो वा अम्बा वा किंणुखु भणिस्सदि त्ति आविग्गा विअ संवुत्ता ।

राजा[2] — पद्मावति ! एवमेतत् ।

किं वक्ष्यतीति हृदयं परिशङ्कितं मे
कन्या मयाप्यपहृता न च रक्षिता सा ।
भाग्यैश्चलैर्म*हदवाप्तगुणोपघातः
पुत्रः पितुर्जनितरोष इवास्मि भीतः[3] ॥ ४ ॥

(क) आर्यपुत्र ! किं मया सहोपविष्ट एतं जनं प्रेक्षिष्यते ।

(ख) आर्यपुत्रस्यापरः परिग्रह इति उदासीनमिव भवति ।

(ग) यदार्यपुत्र आज्ञापयति । आर्यपुत्र ! तातो वाम्बा वा किन्नुखलु भणिष्यतीत्याविग्नेव संवृत्ता ।

१. 'शति)' क. पाठः. २. 'जा—ए' क. ख. पाठः. ३. 'तः ॥ (ततः' क. पाठः.

* महदिति भयक्रियाविशेषणम् ।

पद्मावती—(क) ण किं सक्कं रक्खिदुं पत्तकाळे।

प्रतीहारी—(ख) एसो कञ्चुईओ धत्ती अ पडिहारं उवट्ठिदा।

राजा—शीघ्रं प्रवेश्यताम्।

प्रतीहारी—(ग) जं भट्टा आणवेदि। (निष्क्रान्ता)

(ततः प्रविशति काञ्चुकीयो धात्री प्रतीहारी च)

काञ्चुकीयः—भोः!

सम्बन्धिराज्यमिदमेत्य महान् प्रहर्षः
स्मृत्वा पुनर्नृपसुतानिधनं विषादः।
किं नाम दैव! भवता न कृतं यदि स्याद्
राज्यं परैरपहृतं कुशलं च देव्याः॥ ५॥

प्रतीहारी—(घ) एसो भट्टा, उवसप्पदु अय्यो।

काञ्चुकीयः—(उपेत्य) जयत्वार्यपुत्रः।

धात्री—(ङ) जेदु भट्टा।

राजा—(सबहुमानम्) आर्य!

(क) न किं शक्यं रक्षितुं प्राप्तकाले।

(ख) एष काञ्चुकीयो धात्री च प्रतीहारमुपस्थितौ।

(ग) यद् भर्ताज्ञापयति।

(घ) एष भर्ता, उपसर्पत्वार्यः।

(ङ) जयतु भर्ता।

---

१. 'यः—ज' ख., 'यः—(उपसृत्य) ज' घ. पाठः.

पृथिव्यां राजवंश्यानामुदयास्तमयप्रभुः ।
अपि राजा स कुशली मया काङ्क्षितबान्धवः ॥६॥

काञ्चुकीयः — अथकिम् । कुशली महासेनः । इहापि सर्वगतं कुशलं पृच्छति ।

राजा[1] — (आसनादुत्थाय) किमाज्ञापयति महासेनः ।

काञ्चुकीयः — सदृशमेतद् वैदेहीपुत्रस्य । नैन्वासन[2]-स्थेनैव भवता श्रोतव्यो महासेनस्य सन्देशः ।

राजा — यदाज्ञापयति महासेनः । (उपविशति)

काञ्चुकीयः — दिष्ट्या परैरपहृतं राज्यं पुनः प्रत्यानीतमिति । कुतः,

कातरा येऽप्यशक्ता वा नोत्साहस्तेषु जायते ।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते ॥ ७ ॥

राजा — आर्य ! सर्वमेतन्महासेनस्य प्रभावः[3] ।

अहमवजितः पूर्वं तावत् सुतैः सह लालितो
दृढमपहृता कन्या भूयो मया न च रक्षिता ।
निधनमपि च श्रुत्वा तस्यास्तथैव मयि स्वता
ननु यदुचितान् वत्सान् प्राप्तुं नृपोऽत्र हि कारणम् ॥८॥

काञ्चुकीयः — एष महासेनस्य सन्देशः[4] । देव्याः सन्देशमिहात्रभवती कथयिष्यति ।

---

१ 'जा — (उत्था' क. पाठः. २. 'न न न, आस' ग. घ. पाठः. ३. 'वः । कुतः, अ', ४. 'शः । तत्रभवत्याः स' ख. पाठः.

राजा—हा अम्ब!

षोडशान्तःपुरज्येष्ठा पुण्या नगरदेवता।
मम प्रवासदुःखार्ता माता कुशलिनी ननु॥ ९॥

धात्री—(क) अरोआ भट्टिणी भट्टारं सव्वगदं कुसळं पुच्छदि।

राजा—सर्वगतं कुशलमिति। अम्ब! ईदृशं कुशलम्।

धात्री—(ख) मा दाणिं भट्टा अदिमत्तं सन्तप्पिदुं।

काञ्चुकीयः—धारयत्वार्यपुत्रः। उपरताप्यनुपरता महासेनपुत्री एवमनुकम्प्यमानार्यपुत्रेण[2]। अथवा,

कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं[3] धारयन्ति।
एवं लोकस्तुल्यध(र्मो ? र्मा) वनानां
काले काले छिद्यते रुह्यते च॥ १०॥

राजा—आर्य! मा मैवं,

महासेनस्य दुहिता शिष्या देवी च मे प्रिया।
कथं सा न मया शक्या स्मर्तुं देहान्तरेष्वपि॥ ११॥

(क) अरोगा भट्टिनी भर्तारं सर्वगतं कुशलं पृच्छति।

(ख) मेदानीं भर्तातिमात्रं सन्तप्तुम्।

---

१. 'प्पिअ। (ह्री ? ईरि) सं दाणिं एदं।', २. 'ना ह्यार्य', ३. 'कु' ख. पाठः.

धात्री —(क) आह भट्टिणी—उवरदा वासवदत्ता। मम वा महासेणस्स वा जादिसा गोवाळअपाळआ[$] तादिसो एव्व तुमं पुढमं एव्व अभिप्पेदो जामादुअत्ति । एदण्णिमित्तं उज्जइणिं आणीदो । अणग्गिसक्खिअं वीणाववदेसेण दिण्णा । अत्तणो चवळदाए अणिव्वुत्तविवाहमङ्गळो एव्व गदो । अहअ अह्मेहिं तव अ वासवदत्ताए अ पडिकिदिं चित्तफळआए आळिहिअ विवाहो णिव्वुत्तो । एसा चित्तफळआ तव सआसं पेसिदा । एदं पेक्खिअ णिव्वुदो होहि ।

राजा —अहो अतिस्निग्धमनुरूपं चाभिहितं तत्रभवत्या ।

वाक्यमेतत् प्रियतरं राज्यलाभशतादपि ।
अपराद्धेष्वपि स्नेहो यदस्मासु न विस्मृतः ॥ १२ ॥

पद्मावती —(ख) अय्यउत्त! चित्तगदं गुरुअणं पेक्खिअ अभिवादेदुं इच्छामि ।

(क) आह भट्टिनी—उपरता वासवदत्ता। मम वा महासेनस्य वा यादृशौ गोपालकपालकौ, तादृश एव त्वं प्रथममेवाभिप्रेतो जामातेति । एतन्निमित्तमुज्जयिनीमानीतः । अनग्निसाक्षिकं वीणाव्यपदेशेन दत्ता । आत्मनश्चपलतयानिर्वृत्तविवाहमङ्गल एव गतः । अथचावाभ्यां तव च वासवदत्तायाश्च प्रतिकृतिं चित्रफलकायामालिख्य विवाहो निर्वृत्तः । एषा चित्रफलका तव सकाशं प्रेषिता । एतां प्रेक्ष्य निर्वृतो भव ।

(ख) आर्यपुत्र! चित्रगतं गुरुजनं प्रेक्ष्याभिवादयितुमिच्छामि ।

$ गोपालकपालकौ वासवदत्ताभ्रातरौ ।

‡धात्री — (क) पेक्खदु पेक्खदु भट्टिदारिआ । (चित्रफलकां दर्शयति)

पद्मावती — (दृष्ट्वा आत्मगतम्) (ख) हं अदिसदिसी खु इअं अय्याए आवन्तिआए । (प्रकाशम्) अय्यउत्त! सदिसी खु इअं अय्याए ।

राजा — न सदृशी । सैवेति मन्ये । भोः कष्टम्,

अस्य स्निग्धस्य वर्णस्य विपत्तिर्दारुणा कथम् ।
इदं च मुखमाधुर्यं कथं दूषितमग्निना ॥ १३ ॥

पद्मावती — (ग) अय्यउत्तस्स पडिकिदिं पेक्खिअ जाणामि इअं अय्याए सदिसी ण वेत्ति ।

धात्री — (घ) पेक्खदु पेक्खदु भट्टिदारिआ ।

पद्माव[1]ती — (दृष्ट्वा) (ङ) अय्यउत्तस्स पडिकिदीए सदिसदाए जाणामि इअं अय्याए सदिसि[2] त्ति ।

(क) प्रेक्षतां प्रेक्षतां भर्तृदारिका ।

(ख) हम् अतिसदृशी खल्वियमार्याया आवन्तिकायाः । आर्यपुत्र! सदृशी खल्वियमार्यायाः ।

(ग) आर्यपुत्रस्य प्रतिकृतिं प्रेक्ष्य जानामीयमार्यया सदृशी नवेति ।

(घ) प्रेक्षतां प्रेक्षतां भर्तृदारिका ।

(ङ) आर्यपुत्रस्य प्रतिकृत्याः सदृशतया जानामीयमार्यया सदृशीति ।

---

१. 'ती—अय्यउत्तपडिकिदिसदि(ति?)साभाए जा', २. 'सी किं ।' ख. पाठः.

---

‡ एतदारभ्य ण वेत्तीत्यन्तं ख. पुस्तके नास्ति ।

राजा[1] — देवि! चित्रदर्शनात् प्रभृति प्रहृष्टोद्विग्नामिव[2] त्वां पश्यामि। किमिदम्।

पद्मावती— (क) अय्यउत्त! इमाए पडिकिदीए *सदिसी इह एव्व पडिवसदि।

राजा[3] — किं वासवदत्तायाः।

पद्मावती — आम।

राजा — तेन हि शीघ्र[4]मानीयताम्।

पद्मावती — (ख) अय्यउत्त! मम कण्णाभावे केणवि बह्मणेण मम भइणिअत्ति ण्णासो णिक्खित्तो। पोसिद-भत्तुआ परपुरुसदंसणं परिहरदि! ‡ता अय्यं मए सह आ-अदं पेक्खिअ जाणादु अय्यउत्तो।

राजा —

यदि विप्रस्य भगिनी व्यक्तमन्या भविष्यति।
परस्परगता लोके दृश्यते रूपतुल्यता॥ १४॥

(क) आर्यपुत्र! अस्याः प्रतिकृत्याः सदृशीह प्रतिवसति।

(ख) आर्यपुत्र! मम कन्याभावे केनापि ब्राह्मणेन मम भगिनिकेति न्यासो निक्षिप्तः। प्रोषितभर्तृका परपुरुषदर्शनं परिहरति। तदार्या मया सहागतां प्रेक्ष्य जानात्वार्यपुत्रः।

---

१. 'जा — पद्मावति! चि', २. 'ति हृ' ख. पाठः। ३. 'जा — न किं वासव-दत्ता। आम्।(?)' क. पाठः. ४. 'घ्रं प्रवेश्यताम्' घ. पाठः.

---

* एतदारभ्य 'आनीयताम्' इत्यन्तं ख. पुस्तके त्रुटितम्। ‡ 'ता' इत्यादि वाक्यं ख. पुस्तके नास्ति।

(प्रविश्य)

प्रतीहारी — (क) जेदु भट्टा । एसो उज्जइणीओ बह्मणो, भट्टिणीए हत्थे[2] मम भइणिअ त्ति णासो णिक्खित्तो, तं पडिग्गाहिदुं[3] पडिहारं उवट्ठिदो ।

राजा — पद्मावति ! किन्नु स ब्राह्मणः ।

पद्मावती — (ख) होदव्वं ।

राजा — शीघ्रं प्रवेश्यतामभ्यन्तरसमुदाचारेण स ब्राह्मणः ।

प्रतीहारी — (ग) जं भट्टा आणवेदि । (निष्क्रान्ता)

$राजा — पद्मावति ! त्वमपि तामानय ।

पद्मावती — (घ) जं अय्यउत्तो आणवेदि । (निष्क्रान्ता)

(ततः प्रविशति यौगन्धरायणः प्रतीहारी च)

यौगन्धरायणः[4] — भोः ! (आत्मगतम्)

(क) जयतु भर्ता । एष उज्जयिनीयो ब्राह्मणः, भट्टिन्या हस्ते मम भगिनिकेति न्यासो निक्षिप्तः, तं प्रतिग्रहीतुं प्रतिहारमुपस्थितः ।

(ख) भवितव्यम् ।

(ग) यद् भर्ताज्ञापयति ।

(घ) यद् आर्यपुत्र आज्ञापयति ।

---

१. 'णीह', २. 'त्थे ण्णा', ३. 'दुं उ' ख. पाठः. ४. 'णः—प्र' क. पाठः.

$ 'राजे'त्यादि निष्क्रान्ता' इत्यन्तं ख. पुस्तके नास्ति ।

प्रच्छाद्य राजमहिषीं नृपतेर्हितार्थं
कामं मया कृतमिदं हितमित्यवेक्ष्य ।
सिद्धेऽपि नाम मम कर्मणि पार्थिवोऽसौ
किं वक्ष्यतीति हृदयं परिशङ्कितं मे ॥ १५ ॥

प्रतीहारी — (क) एसो[१] भट्टा । उपसप्पदु अय्यो ।

यौगन्धरायणः — (उपसृत्य) जयतु भवान् जयतु ।

राजा — श्रुतपूर्व इव स्वरः[२] । भो ब्राह्मण! किं भवतः स्वसा पद्मावत्या हस्ते न्यास इति निक्षिप्ता ।

यौगन्धरायणः — अथकिम् ।

राजा[३] — तेन हि त्वर्यतां त्वर्यतामस्य भगिनिका ।

प्रतीहारी — (ख) जं भट्टा आणवेदि । (निष्क्रान्ता)

(ततः प्रविशति पद्मावती[४] आवन्तिका प्रतीहारी च)

पद्मावती — (ग) एदु एदु अय्या । पिअं दे णिवेदेमि ।

(क) एष भर्ता । उपसर्पत्वार्यः ।

(ख) यद् भर्ताज्ञापयति ।

(ग) एत्वेत्वार्या । प्रियं ते निवेदयामि ।

---

१. 'एदु एदु अय्यो । एसो', २. 'रः । त्वर्यं' घ. पाठः. ३. 'जा—त्व' ख. पाठः. ४. 'ती सपरिवारा वासवदत्ता च)' घ पाठः.

आवन्तिका—किं[1] किं ।

पद्मावती—(क) भादा दे आअदो ।

आवन्तिका—(ख) दिट्ठिओ[2] इदाणिं पि सुमरदि ।

पद्मावती—(ग) (उपसृत्य) जेदु अय्यउत्तो[3]। एसो णासो।

राजा[4]—निर्यातय[5] पद्मावति ! । साक्षिमान्[6] न्यासो निर्यातयितव्यः । इहात्रभवान् रैभ्यः, अत्रभवती चाधिकरणं भविष्यतः ।

पद्मावती—(घ) अय्य[7]! णीअदां दाणिं अय्या ।

धात्री[8]—(आवन्तिकां निर्वर्ण्य) (ङ) अम्मो[9] भट्टिदारिआ वासवदत्ता ।

राजा—कथं महासेनपुत्री । देवि! प्रविश त्वमभ्यन्तरं पद्मावत्या सह ।

यौगन्धरायणः—नखलु नखलु प्रवेष्टव्यम् । मम भगिनी खल्वेषा[10] ।

(क) भ्राता ते आगतः ।

(ख) दिष्ट्येदानीमपि स्मरति ।

(ग) जयत्वार्यपुत्रः । एष न्यासः ।

(घ) आर्य ! नीयतामिदानीमार्या ।

(ङ) अम्मो भर्तृदारिका वासवदत्ता ।

---

१. 'किं ।', २. 'ट्ठी दाणिं सु' ख. पाठः. ३. 'त्तो । रा', ४. 'जा -- प' क. पाठः. ५. 'ति! अथवा सा' ग. पाठः. ६. 'म' क. पाठः. ७. 'अम्ब ! इअं दाणिं' ख. पाठः, 'अय्य ! इअं दाणिं' क. पाठः. ८. 'त्री --(नि', ९. 'ह्मो' ख. पाठः. १०. 'षा । भो' ख. घ. पाठः.

राजा — किं भवानाह । महासेनपुत्री खल्वेषा ।

यौगन्धरायणः — भो राजन्!

भारतानां कुले जातो विनीतो ज्ञानवाञ्छुचिः ।
तन्नार्हसि बलाद्धर्तुं राजधर्मस्य देशिकः ॥ १६ ॥

राजा — भवतु पश्यामस्तावद्[1] रूपसादृश्यम् । संक्षिप्यतां यवनिका ।

यौगन्धरायणः — जयतु स्वामी ।

वासवदत्ता — (क) जेदु अय्यउत्तो ।

राजा — अये असौ यौगन्धरायणः, इयं महासेनपुत्री ।

किन्नु सत्यमिदं स्वप्नः सा भूयो दृश्यते मया ।
अनयाप्येवमेवाहं दृष्टया वञ्चितस्तदा* ॥ १७ ॥

यौगन्धरायणः — स्वामिन्! देव्यपनयेन कृतापराधः खल्वहम् । तत् क्षन्तुमर्हति स्वामी । (पादयोः पतति)

राजा — (उत्थाप्य) यौगन्धरायणो भवान् ननु ।

मिथ्योन्मादैश्च युद्धैश्च शास्त्रदृष्टैश्च मन्त्रितैः ।
भवद्यत्नैः खलु वयं †मज्जमानाः ‡समुद्धृताः ॥ १८ ॥

(क) जयत्वार्यपुत्रः ।

---

१. 'दत्र सा', २. 'वयस्य! यौ' ख. पाठः.

---

* तदा स्वप्नसमये । † मज्जमाना मज्जनशीलाः । ‡ समुद्धरणं च प्रद्योतकारागृहात् वत्सराजस्य मोचनम् । एतच्च प्रतिज्ञानाटिकायां स्पष्टम् ।

यौगन्धरायणः— स्वामिश्लाघ्यानामनुगन्तारो वयम् ।

पद्मावती—(क) अम्महे अय्या खु इअं । अय्ये! सहीजणसमुदाआरेण अदिक्कन्दो समुदाआरो । ता सीसेण पसादेमि§ ।

वासवदत्ता[2]—(पद्मावतीमुत्थाप्य) (ख) उट्ठेहि उट्ठेहि अविहवे! उट्ठेहि । अत्थिसअं णाम सरीरं अवरज्झइ[3] ।

पद्मावती—(ग) अणुग्गहिदह्मि ।

राजा[4]—वयस्य यौगन्धरायण! देव्यपनये का कृता ते बुद्धिः ।

यौगन्धरायणः—कौशाम्बीमात्रं परिपालयामीति ।

राजा—अथ पद्मावत्या हस्ते किं न्यासकारणम् ।

यौगन्धरायणः—पुष्पकभद्रादिभिरादेशिकैरादिष्टा स्वामिन्ने देवी भविष्यतीति ।

राजा—इदमपि रुमण्वता ज्ञातम् ।

(क) अहो आर्या खल्वियम् । आर्ये! सखीजनसमुदाचारेणातिक्रान्तः समुदाचारः, तत् शीर्षेण प्रसादयामि ।

(ख) उत्तिष्ठोत्तिष्ठाविधवे! उत्तिष्ठ । अर्थिस्वं नाम शरीरमपराध्यति ।

(ग) अनुगृहीतास्मि ।

१. 'म्मो अ', २. 'त्ता उत्था' ख. पाठः ३. 'ज्झ' घ. पाठः. ४. 'जा—यौ' ख. पाठः.

§ एतदुत्तरं ('पादयोः पतति') इति पठितुमर्हम् ।

यौगन्धरायणः[1] — स्वामिन्! सर्वैरेव ज्ञातम् ।

राजा — अहो शठः खलु रुमण्वान् ।

यौगन्धरायणः — स्वामिन्! देव्याः कुशलनिवेदनार्थमद्यैव प्रतिनिवर्ततामत्रभवान् रैभ्यो[2]ऽत्रभवती च ।

राजा[3] — न न, सर्व एव वयं यास्यामो देव्या पद्मावत्या सह ।

(भरतवाक्यम्)

इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् ।
महीमेकातपत्राङ्कां[4] राजसिंहः प्रशास्तु नः ॥ १९ ॥

(निष्क्रान्ताः सर्वे)

षष्ठोऽङ्कः ।

इति स्वप्ननाटक(म)वसितम् ।

शुभं भूयात् ।

---

१. 'णः — स' पाठः. २. 'भ्य इहात्र' क. घ. पाठः. ३. 'जा — ननु स' ख., 'जा — स' क. घ. पाठः ४. 'न्तां' क. पाठः. ५. 'वासवदत्ता समाप्ता ।' ख. पाठः.

श्लोकानुक्रमणिका ।

	पृष्ठम्
अनाहारे तुल्यः	१५
अनेन परिहा	४८
अस्य स्निग्धस्य	७९
अहमवजितः	७६
इमां सागरप	८६
इयं बाला नवो	५१
उदयनवेन्दु	१
उपेत्य नागेन्द्र	६८
ऋज्वायतां च वि	३९
ऋज्वायतां हि मु	५८
कस्यार्थः कल	७
कः कं शक्तो रक्षि	७७
कातरा येऽप्यश	७६
कामेनोज्जयिनीं	३८
कार्यं नैवार्थैः	८
किं वक्ष्यतीति ह	७४
किन्नु सत्यमिदं	८४
खगा वासोपेताः	१८
गुणानां वा वि	५२
चिरप्रसुप्तः का	७२
तीर्थोदकानि	४
दुःखं त्यक्तुं बद्ध	४९
धीरस्याश्रमसं	२
निष्कामन् सम्भ्र	६५
नैवेदानीं ता	१४
पद्मावती नर	१०
पद्मावती बहु	४५
परिहरतु भवान्	३
पूर्वं त्वयाप्यभि	,,
पृथिव्यां राजवं	७६
प्रच्छाद्य राजम	८२
प्रद्वेषो बहुमा	५
बहुशोऽप्युपदे	६०
भारतानां कुले	८४
भिन्नास्ते रिपवो	६८
भृत्यैर्मगधरा	२
मधुमदकला	४२
महासेनस्य दु	७७
मिथ्योन्मादैश्च यु	८४
यदि तावदयं	६६
यदि विप्रस्य भ	८०
योऽयं सन्त्रस्तया	६७
रूपश्रिया समु	५७
वाक्यमेतत् प्रिय	७८
विस्रब्धं हरिणा	११
शय्या नावनता	५९
शय्यायामव	६६
शरच्छशाङ्कगौ	५१
श्रुतिसुखनिन	७१
श्रोणीसमुद्वह	,,
श्लाघ्यामवन्तिनृ	५६
षोडशान्तःपुर	७७
सम्बन्धिराज्यम्	७५
सविभ्रमं ह्ययं	१५
सुखमर्थो भ	९
स्मराम्यवन्त्याधि	६०
स्वप्नस्यान्ते विबु	६७